तानिरूपितकारणताशालि । अनन्यथासिद्धमिति । अनन्यथासिद्धत्वं नियतपूर्ववर्तितावच्छेदकधर्मा

वच्छेदेन पौष्णाकार्यमतिन कारणत्वव्यवहारः । प्रामाणिकानंतरूपावच्छिन्नमेव तादृशकार्यं । अन्यथासि १७

द्धत्वं नैच्छिन्नत्वं नियतान्यवहितपूर्ववर्तिजातीयत्वे नियतपूर्ववृत्तित्वं च न कपालादेर्द्रव्यत्वादिनाऽन्य

त

द्वि

थासिद्धत्वात्तन्देदोनास्तीति कपालत्वादिना हेतुत्वे न स्यादिति वाच्यं । येन येन रूपेणान्यथासिद्धिस्तत्तद्भिन्न

नियतपूर्ववर्तितावच्छेदकरूपवत्त्वस्य विवक्षितत्वात् । कार्याव्यवहितपूर्वक्षणावच्छेदेन कार्यतावच्छेदक

संबंधेन कार्याधिकरणे विशेषणतया विशेषेणाऽव्यभिचारभावस्य कारणतावच्छेदकसंबंधावच्छिन्नप्रतियोगि

तानवच्छेदकधर्मवत्त्वं नियताव्यवहितपूर्ववर्तिजातीयत्वं तथा च यद्धर्मावच्छिन्नान्यथासिद्धिनिरूपक

नियतपूर्ववर्तितावच्छेदकपदस्यमेवत्वं तद्धर्मावच्छिन्नस्यापि तस्य मे पुरस्कारेण कारणत्वमिति निष्कर्षः ।

कपालादेर्द्रव्यत्वादिना हेतुत्ववारणाय यानिरूपकांतेन तत्तद्दंडत्वादिना घटत्वावच्छिन्नकारणत्वमुदा

सायनियतपूर्ववर्तितावच्छेदके । ति । कारणं त्रिविधमिति । कारणनिष्ठा विधाः प्रकाराः समवायिकारण

त्वासमवायिकारणत्वनिमित्तकारणत्वरूपाय स्मातादृशकारणं त्रिविधमिति फलितोऽर्थः । समवाय

संबंधावच्छिन्नकार्यतानिरूपितताद्धात्म्यसंबंधावच्छिन्नकारणता समवायिकारणता । अनुमित्या

दौ परामर्शादेः समवायिकारणत्वाव्यवहारात्तन्देदहूरस्याप्यसमवायिकारणं घटकशरीरघटकत्वात्

तदुभयभिन्नकारणत्वेन निमित्तकारणता यथा तेन वदन्ति । तंतुसमवेतस्य पटस्योत्पत्तेः पटस्य स्वगतरूप

१८ देरिति। समवायिकारणमित्यनुषज्यते। यथा तंतुसंयोग इति। पटरूपकार्येण सहैकस्मिन्नर्थे तंतौ तं
तुसंयोगस्य समवेतत्वात्। तंतुरूपं पटरूपस्येति। अत्रासमवायिकारणमित्यनुषज्यते॥ रूपकारणेन पटेन स
हैकस्मिन्नर्थे तंतौ तंतुरूपस्य समवेतत्वात्। यथाद्यवृत्तीति। तुरीवेमादीनां संयोगेन कारणत्वं बोध्यं। इंद्रि गे९
यार्थेति। विषयतासंबंधेन चाक्षुषं प्रति समवायसंबंधेन चक्षुःसंयोगादीनां कारणत्वात्। समवाय
संबंधावच्छिन्नचक्षुःसंयोगनिष्ठकारणतानिरूपितविषयत्वसंबंधावच्छिन्नकार्यतावद्भ्रान्त्यनुमि
तिध त्यादिज्ञानभिन्नत्वं लक्षणं तेनेंद्रियत्वस्य॥ था थस्य चैकस्याननुगतत्वेपि न क्षतिः। एवं च तेन शाब्दत्वादे
ध१ रवृत्तेः तेन ज्ञानत्वादेरपि व्युदासः। निष्प्रकारकमिति। प्रकारत्वानिरूपकमित्यर्थः। निर्विकल्पके घटघटत्वसम ल५
वायानामवगाहनेपि तेषु प्रकारत्वादीनामवगाहनात् प्रकारत्वाद्यतिरिक्तैव निर्विकल्पकीयविषय
तेति बोध्यं। सप्रकारकमिति। प्रकारतानिरूपकमित्यर्थः। यथा डित्थोयमिति। डित्थोयमित्यत्र संज्ञाप्र
कारः। ब्राह्मणोयमित्यत्र जातिः। श्यामः इत्यत्र रूपं। संयोग इति। ननु रूपींद्रियग्राह्यार्थमात्रस्य चक्षुःसंयुक्तस १८
मवायेन घटादिग्रहसंभवे संयोगस्य प्रत्यासत्तित्वे मानाभाव इति चेन्न। आत्मग्राह्यार्थतदावश्यक

यवं१

त्वात्। परमाणुद्व्यणुकादिरूपप्रत्यक्षवारणाय परमाण्वादौ पृथिवीत्वग्रहवारणाय च चक्षुःसंयुक्तम
हदुद्भूतरूपवत्समवायत्वेन हेतुत्वकल्पनस्यावश्यकत्वात् पात्रसंयुक्तग्राह्ये च न तदावश्यकत्वात्। चक्षु
षाग्रहे आलोकवृत्तिसंयोगोपि महत्कार्ये न च चक्षुःसंयोगेनावच्छेदकेन कार्यमपेक्षते नातो भिन्न ग्रा
भिन्नावच्छेदेन चक्षुरालोकसंयोगसत्त्वे प्रत्यक्षापत्तिः। न च तेजःप्रत्यक्षे व्यभिचारः। तेजस्यपि तेजो
वृत्तिचक्षुरादिसंयोगसत्त्वात्। आलोकत्वं चोद्भूतरूपानभिभूतरूपवन्महत्त्ववत्तेजस्त्वं तेन स्वर्णादे दे
र्व्युदासः। श्रोत्रेणेति। न च शब्दश्रावणत्वावच्छिन्ने श्रोत्रसमवायत्वेन हेतुत्वे सर्वेषां विद्यमाननिर्वि
लशब्दसाक्षात्कारापत्तिरिति वाच्यं। तत्तत्पुरुषीयशब्दश्रावणत्वावच्छिन्नं प्रति विजातीयकर्णावच्छिन्न
समवायत्वेन हेतुत्वोपगमात् प्रतिपुरुषं कर्णे जात्युपगमात्। शब्दत्वसमवायिकर्णावच्छिन्नत्वोप
गमात्। अभावप्रत्यक्ष इति। इदमुपलक्षणं। समवायप्रत्यक्षस्यापि बोध्यं। घटवत्यपि भूतले घटाभाव
सत्त्वेन तत्प्रत्यक्षवारणायाभावप्रत्यक्षे योग्यानुपलब्धिरपि कारणं। सा च प्रतियोग्युपलंभाभावाधा
रणकारणेनत्पाद्यत्वाच्चोपलंभकसहितानुपलब्धिः। तदुपलंभकं च महत्त्वोद्भूतरूपालोकसंयोगा

ब्द

दिरूपेण नानाविधं कार्यवशादुन्नेयं तेन जलपरमाणौ पृथिवीत्वाभावो न गृह्यते। महत्वाभावादित्य
१९ धिकमात्रे। सामान्यलक्षणाज्ञानलक्षणयोगजधर्मणो विशेषणं ज्ञानं तमेवं मणिमिश्रादिसम
तमभिप्रेत्य सन्निकर्षषट्कमत्राभिधानं। मते। मतान्तरे तु अलौकिकसन्निकर्षस्त्रिधा। सामान्यलक्ष
णाज्ञानलक्षणायोगजधर्मश्चेति।। सामान्यं लक्षणं निरूपकं यस्याः सा सामान्यलक्षणा लौकिकान्यमुख्य
धे विशेष्यतानिरूपितप्रकारतासंबंधेन चाक्षुषत्वावच्छिन्नप्रतिप्रकारतासंबंधेन चाक्षुषत्वेन कारणता।। ५
लौकिकान्यत्वनिवेशान्न निर्विकल्पकोत्तरोत्पन्नसविकल्पकेन व्यभिचारः। विशेष्यतायां प्रकारता
भिन्नत्वरूपमुख्यत्वनिवेशान्न घटत्वप्रकारकस्मरणादिजन्योपनीतभानेन व्यभिचारः। ज्ञानलक्ष
णाज्ञानंलक्षणं स्वरूपं यस्याः सा। तस्यास्तु तदलौकिकप्रत्यक्षं प्रति तद्विषयकज्ञानत्वेन कारणतेति। यो
गजधर्मश्च योगाभ्यासजन्यापुण्यविशेषः। तत्कार्यकारणभावश्च समवायेन तद्विशिष्टसाक्षात्कारत्वाव
च्छिन्नं प्रति तादृशपुण्यविशेषत्वेन कौसमवायेन कारणतेति संक्षेपः।। ।।इति प्रत्यक्षपरिच्छेदः।। ।। ।। ।। १९
अवसरसंगत्यर्थमाह व्याख्यातमिति। तथा च प्रतिबंधकीभूतशिष्यजिज्ञासानिवर्तकत्वेनावश्यवक्त

व्यत्वज्ञानादनुमाननिरूपणमिति भावः। अनुमितीति। अनुमितिसंबंधिभिन्नं करणमनुमानमितिस
अर्थः।। लक्षणं त्वनुमितिकरणत्वमात्रं अधिकस्य व्यर्थत्वात्। लक्षणवाक्यजन्यबोधविषयस्यैव ल
क्षणत्वमिति नियमे मानाभावात्। प्रसंगादनुमितेर्लक्षणमाह परामर्शेति। परामर्शत्वावच्छिन्नकार
णतानिरूपितकार्यतावच्छेदकानुमिति[illegible]त्वाख्यजातिमत्त्वमित्यर्थः।। परामर्शत्वं च जातिविशेषः
अनुमितिकारणतावच्छेदकतया सिद्धः। व्याप्तिविशिष्टमिति। व्याप्तिप्रकारकमित्यर्थः व्याप्तिलक्षणमा क्ष
हायत्रेति। साहचर्यं नियम इति। कृदभिहित इति मापान्नियतं साहचर्यमित्यर्थः। तच्च हेतुतावच्छेद
दि ५ केवलित्वे साध्यतावच्छेदकमितिनाति व्याप्तिः। कपिसंयोगी एतद्वृक्षत्वादित्यादावव्याप्तिवारणाय निर
वच्छिन्नवृत्तिकेत्यभावविशेषणं।। कपिसंयोगाभावस्तु वृक्षादौ निरवच्छिन्नवृत्तिः। मूलादेस्तदवच्छेदक
त्वात्। हेतुतावच्छेदकावच्छिन्नेति करणाच्च विशिष्टसत्त्वस्य सत्तानतिरिक्ततया सत्ताधिकरणगुणादि
निष्ठाभावप्रतियोगितावच्छेदकत्वस्य द्रव्यत्वे सत्त्वेऽपि द्रव्यं विशिष्टसत्त्वादित्यादौ व्याप्तिः। हेत्वधिकरण अ२
त्वं हेतुतावच्छेदकसंबंधेन नेन वह्नित्वस्य कालिकसंबंधेन धूमाधिकरणह्रदादिनिष्ठाभावप्रतियोगि

इदभिहितोभावोद्रव्यवत्प्रकाशते-६

नू

तावच्छेदकत्वेपि तद्वह्निमान् धूमादित्यादौ व्याप्तिः हेत्वधिकरणवृत्तित्वं चाभावस्य दैशिकविशेषणत
२० दि या संसर्गेणाभावाभावस्य धारणी घटो नास्ति घटाभावो नास्तीति प्रतीतेस्तु त्वत्वावच्छिन्नप्रतियोगिताच साध्यता
वच्छेदकसंबंधावच्छिन्नत्वाख्यातत्वात्तु समवायादिसंबंधावच्छिन्नप्रतियोगितावच्छेदकत्वस्य वह्नित्वेस्य
दा पि वह्निमान् धूमादित्यादौ व्याप्तिः । सामानाधिकरण्यं च साध्यतावच्छेदकसंबंधेन साध्याधिकरणे
हेतुतावच्छेदकसंबंधेन वृत्तित्वं कंबुग्रीवादिमान् घट इति प्रतीत्या गुरुधर्मस्यापि प्रतियोगितावच
च्छेदकत्वस्वीकारान्न दुष्टता साध्यतापि व्यभिचारिणि नास्ति व्याप्तिः साध्यसाधनभेदेन व्याप्तेर्भेदो य
त्र साध्यतावच्छेदकं नानात्वप्रतियोगितावच्छेदकता नावच्छेदकं साध्यतावच्छेदकमित्यादिरीत्या
वाच्यं येन येन संबंधेन हेतोः पक्षवृत्तित्वं ज्ञाप्यते तेन तेन संबंधेन ज्ञानाधेयसंबंधावच्छिन्नप्रतियोगितानव
च्छेदकत्वं साध्यतावच्छेदके गम्यते तेन संबंधेन साध्यस्यानुमितिरिति तद्रूपावच्छिन्नत्वेनानुमानमिति । सा
नुमितिहेतुः स्वसमवेतानुमितिमात्रहेतुरित्यर्थः इति न परार्थानुमानस्यापि अनुमितत्वादिदशायां स्वसम
वेतानुमितिजनकत्वेपि न दोषः ॥ भूयोदर्शनेत्यादि ॥ व्यभिचारज्ञानसहकृतसहचारदर्शनेन । व्यभिचारज्ञानवि

धा

रहस्यतत्कादिना तेन भूयोदर्शनस्य भूयस्त्वं भूयःसु दर्शनमित्यादिविकल्पग्रासादिना हेतुत्वेपि न क्षतिः
ते॰२ ॥ पर्वतो धूमवानिति ॥ एकसंबंधिज्ञानस्यापरसंबंधिस्मारकत्वात् धूमत्वज्ञानस्योद्बोधकविधया व्या
प्तिस्मृतिहेतुत्वादिति भावः । तदनंतरं स्मृत्यनंतरं कोपि न प्रांतरं व्याप्तिविशिष्टः लौकिकं धूमांशे लौकिकं ज्ञा
नमुत्पद्यते यत्तु स्वयमेव जिज्ञासुन्मनस्यस्य तद्धिकं उपजन्यशाब्दबोधमूलकमानसंज्ञानमिति विशेषः । एत
दुक्तं पूर्वैर्लिंगपरामर्श इति संबध्यते तथा च तत्स्वार्थानुमानं । यथानेनैवानुमानत्वाभावेनासंगतापत्ते
॥ तथा चार्यन्तस्मात्त्यर्थानि इदं च प्राचीनमतानुरोधेनानव्यमते तु तद्ज्ञानपामितिमपि योगो दृष्टव्यः । अनेन
दिता प्रतिज्ञादिना अनेन नैतद्वाक्यजन्यज्ञानेनं प्रतिपादितानं व्याप्तिपक्षधर्मत्वेन बोधितानं प्रतिपद्यते अनु
मिनोमि तथा च सापप्रयोज्यानुमानपरार्थानुमानमितिफलितं । न्यायत्वं च धातुत्वादिवत् परिभाषावि
शेषविषयत्वं सामान्यलक्षणापूर्वकं तद्वयवान्विभजते । प्रतिज्ञेति । अत्र वयवत्वं च प्रतिज्ञा व्यवृत्तम त्वं
अत्र चरमपदलक्षणाप्यत्यन्तमत्वला भः पंचत्वोक्तिस्तु अवयवत्वादिवो आदिमतर्कनिराकरणा इत्यादि २
र्थं उदासीनेषु तु न्यायांतर्गतत्वघटितप्रतिज्ञात्वाद्यभावेनन्नातिप्रसंगः । अर्थवान्यापातगतत्वेसतिप्रतिज्ञा

घस्मतनमत्वेन हेतुकप्रतिज्ञात्वादौ पंचधा तत्र वैशेगौरवात् साध्यहेतो वृत्त्यमित्याद्येकदेशो हेतोर्दृष्टमित्यादा
२१ वति व्याप्तिवारणाय प्रतिज्ञाघटकत्वे सतीति वक्तव्यं॥ प्रतिज्ञात्वंच पक्षतावच्छेदकविशिष्टपक्षे साध्यता
वच्छेदकविशिष्टवैशिष्ट्यबोधकवाक्यत्वं। वस्तुतो यत्र यादृशी प्रतिज्ञा संप्रदायसिद्धा तादृशप्रतिज्ञा
जन्यबोधानामन्यतमबोधजनकत्वं तत्त्वं। अत एव चैत्रः पचतीत्यपगोगिन्यादौ नादृशबोधजनकत्वा
सत्वेपि पर्वतो वह्निमानित्यादौ न तथा। शाब्दज्ञाने पक्षतावच्छेदकावच्छिन्ने वह्निमत्ताभेदेन विषयत्वा
दि मसंगतमिति निरस्तं। साध्यतावच्छेदकमात्रावच्छिन्नविधेयताकत्वाद्विशेषणे कथा हेत्वा
धहेतुत्वापादकपञ्चत्वं हेतुत्वं। उदाहरणत्वं च व्याप्यत्वाभिमतवाहृदुष्यकव्यापकत्वाभिमतबोधहेतुत्वा
पादकपदवत्त्वं। हस्मात् वित स्वार्थबोधकन्यायावयवत्वं च मतभेदेन लक्षणद्वयं वोध्यं नन्वनुमते उदाहर ण
स्य केनाप्याकांक्षाविरहात् लक्षणसंगतिः दृष्टांतप्रयोगस्तु सार्वत्रिकः। तस्य समयबंधाधीनत्वात्
।वीप्साच मतमदग्ध्वनत्तुत प्रदेशयोजनाभावात्। अत एव भवभूतिरपि प्रायुंक्त पघन्यापे प्रतिज्ञाहि जग २१
त्वात्मतनु प्रसत्तत्वेद्दति। उपनयत्वं च प्रकृतपक्षे साध्यव्याप्यहेतुमत्ताबोधकावयवत्वं निगमनत्वं चाव

यवार्थविशेष्यकस्वार्थविशिष्टबोधकावयवत्वं हेतुवाक्यजनितप्रतियोगिकस्वार्थान्वयबोधज
नकत्वं संभवात्। प्रतिज्ञालाघवं गौरवं प्रतिज्ञानंतरं कुतः इत्याकांक्षायां निवर्तकं हेतुवचनमिति तदपि साधनांग
हेतौ चुक्तेः कथमस्यागमकत्वमित्याकांक्षायां सपक्षधर्मतयोरूपदर्शनप्रायोगत्वमुस्मात् तत्र दर्शना व्या
थोदाहरणं। उदाहरणेन व्याप्तिबोधपितद्विशिष्टहेतोः पक्षे बोधनार्थं द्वोधनायोपनयोपन्यासः नतु
प्रतिज्ञार्थस्य हेत्वाद्याकांक्षायामुपनयानंतरं निगमनस्यानत्तर्दंगतेनिचेन्नाउत्पन्नानुमितौ बाधि
तविषयकत्वादिशंकया प्रामाण्यशंकायां तु दर्शयाबाधितत्वादिज्ञापनायत्तद्वावश्यककत्वा
तान्यथा भव्या बाधितत्वादि विशिष्टसाध्यपदे लक्षणयाति शिष्टत्वाप्यत्वेनाक्षेपाद्वा। अत्र यजरन्न
वीनमतयोर्निष्कर्षप्रकारः। न्यायाहि पंचवाक्यैर्मिलित्वा महावाक्यार्थबोधोजन्यते। तदुक्तं च यम्मू
उमू लकोमानपरामर्शः। तदुक्तरमनुमितिरिति वाक्यार्थबोधस्य वादिजन्यत्वेना प्रामाण्यशंकाकलंकित
त्वात्। अप्रामाण्यज्ञानानास्कंदितपरामर्शस्यैवानुमितिजनकत्वात्। पक्षे साध्यव्याप्यत्वावच्छिन्नस्य प्रका
रकत्वाच्च। तत्र च प्रतिज्ञार्थो वह्निमदभिन्नः पर्वतस्तदेकदेशो वह्निर्हेत्वर्थो धूमज्ञानत्वाप्यत्वान्वयः। तत्र

११ च धूमपदस्य धूमज्ञानेनाप्यत्र्वंच पंचम्याएवव्वाज्ञानज्ञाप्यत्वेलक्षणेति।उदाहरणेचवह्निपदंधूमव्या
पकवह्नौलक्षणावोध्योक्तंतत्पदंचतात्पर्यग्राहक।तथाचधूमवोनधूमव्यापकवह्निमानितिवोध
नचैवमुदाहरणस्यव्याप्तिवोधकत्वाभावइतिवाच्यं।धूमवेतिधूमव्यापकवह्निमत्तावोधेनव्यापक
सामानाधिकरण्यरूपव्याप्तेरपिवोधात्।तथाचवायमित्युपनयेतुतत्पदंशाब्दार्थेवह्निव्याप्योधूमःतस्य
चपर्वतेतत्संयोगादिनान्वयः।निपातार्थत्वात्।तस्मात्तथेतिनिगमनेतुतच्छब्दार्थोऽयंवह्निव्याप्योधू
मःपंचम्यार्थज्ञाप्यत्वंतथाशाब्दार्थश्चवह्निमान्तदेकदेशेवह्नौचपंचम्यार्थत्वान्वयःतत्रस्यचोपनया
नुषक्तायंपदार्थेनाभेदेनान्वयः।नत्वयंपुनरूपनयार्थविशेष्यकनिगमनार्थविशेषणकोवोधइति
वह्निव्याप्यधूमज्ञानज्ञाप्यवह्निमदभिन्नवह्निव्याप्यधूमवत्पर्वतभिन्नधूमव्यापकवह्निमदभिन्न
धूमवदभिन्नधूमज्ञानज्ञाप्यवह्निमदभिन्नःपर्वतइतिमहावाक्यार्थवोधः।।नमन्तेतेचेदनवीना
।उदाहरणस्यकेनाप्यनन्वयात्विशिष्टवाक्यार्थवोधएवासिद्धः।।उदाहरणघटितपंचपत्तत्तदंघटि ११
तवाक्यपोरपिनेकविशिष्टार्थवोधकत्वात्तत्रहितत्पदेनमहानसत्वमहानसात्मत्वादिनोप

स्थापनात्तत्पदेनापितद्रूपावच्छिन्नपरामर्शान्महानसंधूमवद्वह्निमच्चमहानसात्मत्वधूमवत्वह्निमच्चे
तिवाक्यार्थचतुष्पविषयकसमूहालंवनवोधस्यैवोदयात्।नचवीप्सयाव्यापकत्ववोधनात्धूमवान्
धूमव्यापकवह्निमानित्याकारकैकविशिष्टार्थवोधएवनत्वेत्यघतइतिवाच्यं।योयइत्यादेरनन्विततार्थक
त्वासंगात्।नचवह्नित्वेयत्तदस्यैवव्यापकत्वमर्थः।सचसाध्यांशेऽन्वेतीतिवाच्यं।नामार्थयोर्भेदान्वय
स्याव्युत्पन्नत्वात्।नचव्यापकत्वविशिष्टमेवतस्यार्थस्तस्यचाभेदेनसाध्येऽन्वयइतिवाच्यं।सासुंदरणं
डीत्यादौदंडादोसुंदराभेदान्वयवोधानुभवात्मत्वर्थश्रुपप्रकृत्तुपस्थाप्ययोर्थःसमानामार्थाभेदान्वय
स्याव्युत्पन्नत्वात्सोपसत्वेनासमर्थत्वात्साध्यदेशान्तरेतत्वितानुत्पत्त्यापत्तेश्चातस्मात्प्रनेकिरूपकसमूहालं
वनरूपोवोधः।व्यापकतावोधश्चतन्मूलकोमानसः।साध्यपदस्यसाधनव्यापकत्वविशिष्टलोक्षणि
कत्वेनशाब्दोवानचधूमादिहेतुपताविच्छेदकीकृतव्यापकत्वविशिष्टसाध्यवोधएवयत्तत्पदस्यता
त्पर्यग्राहकत्वेनवैयर्थ्याभावादितिवाच्यं।चैत्रोजानातीत्यादिव्यापारांतगैतेपंचकेरोतिसजानातीत्यादोधर्मि
णोऽलाभेनसाध्यानन्वयप्रसंगेनोदाहरणताभासताप्रसंगादित्यादिवहुतरमूह्नीयंतस्मात्मतिज्ञाहेतो

विशिष्टैकार्थबोधकत्वेनैवमप्यंपदानानुषंगपक्षेउपनयनिगमनयोर्विशिष्टैकार्थबोधकत्वेऽन्यथा
२२ पुनःप्रयोगे वैयर्थ्यादिति चेत्तु नोऽननुषंगपक्षेऽप्युपनयस्थापंपदार्थमात्रनिगमनार्थत्वपमात्रयोर्वस्तुतस्तु
त्पत्तमाविशिष्टार्थनिगमनार्थेनियतान्यपाकल्पनादितितत्त्वविभजनेनलिंगमिति। केवलान्वयिपि नि
विप्रतिपन्नंप्रतितल्लक्षणविभागकरणाशक्यत्वादाह अन्वयीति। अन्वयेन व्यतिरेकेण चेति। अ
न्वयेन। अन्वयसहचारेण। व्यतिरेकेण। व्यतिरेकसहचारेण। तथा चान्वयसहचारव्यतिरेकसहचारोभ
यत्ता न्याप्यव्याप्तिकत्वमन्वयव्यतिरेकित्वं अन्वयव्याप्तिसहचारमात्रग्राह्यकत्वं केवलान्वयित्वं।
व्यतिरेकसहचारमात्रग्राह्यव्याप्तिकत्वं केवलव्यतिरेकित्वं यथाश्रुते केवलव्यतिरेकिण्यपि अन्वय
व्यतिरेकव्यतिरेकसहचारमात्रग्राह्यव्यापिकत्वं केवलव्यतिरेकित्वं। यथाश्रुते केवलव्यतिरेकिण्य
प्यन्वयव्यतिरेकव्याप्तिमत्त्वेनासंगतेः दृष्टान्ताभावप्रदर्शनासंगतेश्च। केवलान्वयिनि च विपक्षव्या
वृत्तत्वरहितं च तत्रूपमेव गमकं केवलव्यतिरेकिणा च सपक्षव्यावृत्तित्वरहितं च तत्रूपमेव गमकं ननु केव २३
लान्वयिनि संदेहाभावात्कथमनुमितिरिति चेन्न। प्रमेयत्वं घटनिष्ठात्यन्ताभावप्रतियोगि न वेति संशय

स्यैव प्रसिद्धेः। तस्यापि साध्यधीप्रतिबंधकत्वात् प्रमेयत्वमत्यन्ताभावप्रतियोगीति निश्चयस्यातः संहरत्यन्ये पा
ननु केवलान्वयिनि सपक्षत्वविपक्षत्वाबाधितत्वासत्प्रतिपक्षितत्वरूपपंचरूपोपपन्नत्वाभावेन कथं गम
कता। अन्यथा बाधितत्वासत्प्रतिपक्षितत्वरूपविकल्पमपि गमकं स्यादिति चेन्न। विपक्षव्यावृत्तत्वघटितो वि
पक्षवृत्तित्वशंकानिरासकः पदयोगाच्चेन प्रकृते च विपक्षाभावेन तद्वृत्तित्वशंकानुदयात्। अन्वयव्यति
रेकिणोपि च पंचरूपोपपन्नस्यैव पक्षगमात् व्यतिरेकव्याप्तिज्ञाने च साध्याभावव्यापकस्य साधनाभावत्वज्ञाने सा
ध्याभावव्यापकतया भासमानो यः साधनाभावस्तत्प्रतियोगिव्याप्यपक्षे लिंगज्ञानात्मकानुमानेन साध्यसिद्धे
रानुभविकत्वात्। संदिग्धेति। साध्यप्रकारकसंदेहविशेष्यपक्ष इत्यर्थः। निश्चितसाध्येति। साध्यप्रकारकनिश्चयापि
विशेष्य इत्यर्थः। निश्चितसाध्याभावेति। साध्याभावप्रकारकनिश्चयविशेष्य इत्यर्थः। साध्यसंदेहः पक्षते
ति प्राञ्चः संदेहो न साध्यवत्तानिर्णयप्रतिबंधकत्वेन संग्रहः पक्षः साध्यवान्न वायंक्षे साध्यं न वेदि सकलसंदे
हानां साध्यवत्तानिर्णयप्रतिबन्धकत्वात् प्राचीनमते समानविषयत्वेनैव शिष्टबुद्धिबाधबुद्ध्योः प्रतिबध्यप्र
तिबन्धकभावादिति वदन्ति नवीनास्तु साध्यनिर्णयाभावदशायामनुभूयमानामाः अनुमितेरनुभवि

२४ कत्वात्सिद्धसाधकमात्रवादिनो वदंति नवीनास्तु साध्यसिद्धिव्याप्यविरहविशिष्टसिद्ध्यभाव एव पक्षतेत्या
हुः प्रसंगात्स व्यभिचारविरुद्धप्रकरणसमसाध्यसमातीतकाला हेत्वाभासा इति सोत्रक्रमानुरोधात्सत्वाभा
सान्विभजते सव्यभिचार इत्यादिना प्रकरणसमः सत्प्रतिपक्षः साध्यसमोऽसिद्धः अतीतकालो
बाधः हेत्वाभासत्वं च सव्यभिचारादिघटितमत्वेत्याह सप्राप्तं सव्यभिचारं लक्षयति सव्यभिचारोऽनैकांत
इति। अत्र चानैकांतिकः सव्यभिचार इति शेषः उपपादितपूर्वाभेदोपेक्षया लक्ष्यलक्षणत्वेनान्वयस्थितो यस्यानै
कांतिकपदार्थः प्रसिद्धः प्रसिद्धस्य सव्यभिचारपदार्थत्वं प्रत्ययैनैकांतिक इति लक्षणनिर्देशः। सव्यभिचा
र इति लक्ष्यं तदर्थस्य सव्यभिचारः प्रसिद्धस्य चारपदवाच्यत्वं। एवं विपरीतमपि सारणलक्ष्ययति साध्या
भावेति। साध्येनाभवः साध्याबच्छिन्नप्रतियोगिताकः साध्यवन्नेदः तेनानैकांतिकपि संयोगी एतद्दूषकत्वोदितस्त्वाति
व्याप्ति उपाधेरसाकर्षणोपाधेयस्य कर्पस्यादोषत्वाद्वितस्यचित्स्वसाधारणोपप्य दोषः एतेन व्यापकत्वस्य
हविरोधित्वमेव दूषकताबीजं। असाधारणं लक्षयति सर्वेत्यादि। सर्वेति। सामान्याभावपरिचयापायसपक्ष- २४
साध्यवानत्र ह्यात्मत्वेन तद्वृत्तित्वं तथा च साध्यवद्वृत्तित्वसामान्याभाववत्त्वमसाधारणत्वं। एतस्य तु सामान्या

पिकरणपग्रहप्रतिबंधोद्भावकता बीजं। ननु स्वेत्वाभासव्याप्यस्यापि प्रामशालनत्सत्वाभासत्वं बाधव्याप्य
तु न तथा। तस्य प्रकरणसमत्वात्। प्रकरणसमव्याप्यं न हेत्वाभासोऽविरोधित्वादिति। अनुपसंहारिलक्षण
माह। अन्वयव्यतिरेकेति। यत्वेतु केवलाभिग्रहानुकूलेस सहचारज्ञानं अन्वयविषयकं व्यतिरेकविष
यकं व्यतिरेकविषयकं च तद्वाछिन्नाधिकरणं न भवति भावदा नास्तित्व दा स हेतुनुपसंहारीत्यर्थः। अनु
मितिविरोधित्वेन धाविरोधविरोधविरुद्धत्वान्नान्यषां चानुमतिकरणविरोधित्वेन पक्षहेत्वाभासे हेवि
ध्यापत्तिरीति चेन्न स्वतंत्रेच्छस्य नियोगानुयोगानर्हत्वात्। महिशक्तो दूषितमपि लक्षणं दोषोत्कारम
न सिंति धायविरुद्धं लक्षणमाह। साध्याभावेति। साध्याभावव्याप्तत्वं च समानाधिकरणतान च छे
दकसाध्याभावत्वं तेन मणौ वृद्धहक्रसंयोगादिसाध्यकसत्वेनावगतिव्याप्तिनिरासः एतस्य च अनुमि
तिप्रतिबंधोद्भावकता बीजं। न हि ज्ञानानितदभाव व्याप्यवत्ता ज्ञानस्य प्रतिबंधकत्वात्। सत्प्रतिपक्षं लक्ष
यति। पक्षेति। बाधोपस्थितिसमर्थपरामर्शीकालीनसाध्यसिद्धिसमर्थपरामर्शविशिष्टप्रकृतहेतुत्वं। एकै
कपरामर्शीकाले सामारोपग्रहकाले सत्प्रतिपक्षत्ववारणाय समर्थद्वयं। अतएव च यत्रभाविवत्यभावव्या

२५ ध्यत्वानमप्रमेति त्वानंतनो वह्निर्वह्नित्वदभावव्याप्यवत्तानिरायी।। अथ वह्नेरप्रामाण्यग्रहानाश्वतत्र
सत्प्रतिपक्षत्वापत्तिरपि निरस्ता प्रथमक्षेरोः प्रामाण्यग्रहत्वेन परामर्शस्य बाधोपस्थितिः सामर्थ्याभा
वादिति बाधोपस्थितिसमर्थपरामर्शकालावच्छेदेन साध्यमितिस्तु समर्थपरामर्शविशिष्टत्वस्य वाच्य
त्वात् तत्र "भावपरामर्शकालीनवह्निपरामर्शविशिष्टत्वस्य वह्निपरामर्शेऽपि प्रतिकालावच्छेदेनापि
सत्वान्नेत्कालावच्छेदेन सत्प्रतिपक्षत्वापत्तिः दूषकताबीजं च परस्परप्रतिबंधादनुमित्याद एव सोयं
हेतुरुभौ पक्षौ प्रवर्त्तयन्नन्यतरस्य निर्णायायानकल्पन इति भाष्योक्तारत्नकोशकारास्तु संशयापत्ति का
तत्रिमत्रिमंगीकुर्वंति अस्तित्वं लक्षयति अस्तित्व इति साधारणासाधारणानुपसंहारि भिन्नत्वेति विष
यत्वपोपरामर्शविरोधितावच्छेदकं रूपं अस्तित्वेः।। एवं सर्वत्र यदत्तावच्छेदकविशिष्टपक्षग्रहविरोधिरू
पमाश्रमास्तित्वेः।।गगनीयत्वाभाववद्दरविंदत्वतथेलक्षणसमन्वयः अहतत्पक्षमहत्तहेतुग्रहाविरोधि
नोत्तानस्य विषयत्वपापक्षसाधनेऽभयवैशिष्ट्यग्रहविरोधितावच्छेदकरूपं स्वरूपास्तित्वेः।। आ अपास्तित्व २५
व्याप्यत्वास्तित्वारस्तामाविरोधिन इत्यंततत्त्वचाक्षुषत्वाद्यभावविशिष्टपशहृत्वादिकति। ननूपाधेरप्यनुमि

तिप्रतिबंधकत्वेकथं पंचहेत्वाभासा इत्यत आह सोपाधिक इति। व्याप्यत्वं च व्यभिचारित्वं अस्तित्वं यत्रे
तिवस्तुत्ता व्यभिचारी सत्पर्थः तथा च सोपाधेनाउपाधिनास्य व्यभिचारेण साध्यव्यभिचारोन्नयने व्यभिचा
रस्यैव तत्र दोषत्वेन परमुखनिरीक्षकत्वेनोपाधेर्नहेत्वाभासत्वमिति भावः व्याप्यत्वास्तित्वस्तु एतदुभय
भिन्नोऽस्तित्वः। स्पष्टत्वान्नापं लक्षितमिति भावः उपाधिं लक्षयति तिसाध्यव्यापकत्वे सतीति। यत्वमीवच्छि
न्नसाध्यव्यापकः तत्वमवच्छिन्नसाधनाव्यापक इत्यर्थः तेन सश्यामो मित्रातनयत्वादित्यादौ पुः प्रत्यक्षः प्रत्य
क्षस्पर्शाश्रयत्वादित्यादौ शाकपाकजन्यत्वोद्भूतरूपादौ भूतत्वप्रणामत्वप्रत्यक्षत्वप्रत्यक्षत्वव्यापकेऽत्याभ
वेपिन क्षतिः। मित्रातनयत्वं वह्निर्द्रव्यत्वावच्छिन्नसाध्यव्यापकत्वात्त बाधलक्षयति। यस्येति। यत्वेतु
कसाध्याभावः पक्षे प्रत्यक्षादिनानिश्चित इत्यर्थः।। तथा च साध्याभाववत्पक्षकत्वं बाधितत्वमिति प
र्यवसितं।। इत्यनुमानपः।। ।। दोषपंकनिमग्नेयमनुमानसरस्वती समुद्धृता मुकुंदेन पयामतिवि
वेचनात् १ श्री।। लुब्धानमनुमानमितिपूर्ववत्तउपमितीति। ननूपमानं नमानांतरं प्रत्यक्षतएवतद
र्थसिद्धेरितिचन्नत्र श्रुतवाक्यस्मारितत्वापत्तेः। नन्विपमनुमितिरेव। अनुमानमात्रसिद्धार्थकत्वात्। तथा

हिगवयपदंगवयत्वविशिष्टवाचकं।असतिवृत्त्यंतरेतस्यात्रप्रयुज्यमानत्वात्।योयत्रासतिवृत्त्यंतरेप्रयुज्यतेस
२६ तस्यवाचकः।यथागोशब्दोगोजातीयस्यप्रयुज्यतेचायंगोसदृशइति।नचवृत्त्यंतरंविनाप्रयोगःशक्तिभ
ज्ञात्वातानुमशक्यइतिविशेषणासिद्धिःगोसदृशोगवयपदस्यास्यवाक्यात्गोसादृश्यविशिष्टेगवयशब्द
वाच्यत्वाभावात्गवयत्वविशिष्टेगवयपदप्रयोगासिद्धेरितिदृष्टशक्यासिद्धिश्चेतिचेन्न।वृत्त्यंतरस्यानुप
पत्तिगम्यत्वात्तदभावेतदभावस्यनिर्णयात्गवयत्वोपस्थितौतस्यजातित्वेनाखंडत्वात्गोसादृश्यस्योपा
धित्वेनगुरुत्वात्प्रतीतगुणानांवृत्तेचरणामप्रयोगापत्तेश्चेतिचेन्न।व्याप्यधर्मनिश्चयाधीनेपिजायमानोपा
उपमिनोमीतिविलक्षणानुभवसिद्धायाविलक्षणप्रमितेर्नानुमितित्वमितितत्करणस्यमानान्तरतावश्य
कत्वात्साधर्म्यप्रसिद्धेर्यत्रदृष्टयोरनुगमेनपूर्वानुमानस्यावतारःसंभवात्ज्ञानुगोसादृश्यविशिष्टेगव
यपदवाच्यत्वावगाहिज्ञानमुपमानंगोसादृश्यावच्छिन्नगवयपदवाच्यत्वावगाहिज्ञानमेवोपमितिः।तस्या
श्चशाब्दत्वेबाधकाभावः।प्रमाणांतरकल्पनापेक्षयागोसादृश्यस्यगुरोरवच्छेदकत्वेक्षतिविरहात्इति
चेन्न।गवयत्वप्रकारकशक्तिग्रहाभावेनतत्प्रकारकशाब्दबोधस्यानुभूयमानस्यापत्तौयत्रसंगतेश्शक्तिग्र

हशाब्दबोधयोःसमानप्रकारकत्वेनकार्यकारणभावादितिसिद्धंप्रमाणांतरेणतदुक्तमाचार्यैःन्यायकु
सुमांजलौसंबंधस्यपरिच्छेदःसंज्ञायाःसंज्ञिनासहप्रत्यक्षादेरसाध्यत्वादुपमानफलंविदुरितितदेतत्सक
लमभिसंधायाह।संज्ञेति।गवयोगवयपदशक्तइतिमितिर्ज्ञानमित्युपमितिरितितुमणौकृतःउपमितित्वं
जातिविशेषः।।नचासिद्धिःकारणविशेषकापिवैजात्यमावश्यकमितिकारणंव्याप्यत्वादिस्मृतएवता
याचतद्वृत्तमेवलक्षणंबोध्यं।प्रसिद्धवसाधर्म्यात्साध्यसाधनमुपमानमितिसूत्रस्यापिप्रसिद्धस्यपूर्व
प्रतीतस्यगवादेःसाधर्म्यंसादृश्यंतेनज्ञानात्साध्यस्यगवयादिपदवाच्यत्वस्यसाधनंसिद्धिरुपमानमु
पमितिरितियतइत्यध्याहारेणचकारणलक्षणमित्यर्थात्प्रकृतएवपर्यवसानेबोध्यंवैधर्म्योपमिति
मपिमन्यंतेटीकाकृतः।यथाऽतिदीर्घग्रीवादिपश्वंतरवैधर्म्यज्ञानादुष्ट्रकरभपदवाच्यत्वग्रहः।केचित्वनो
प्युपमानविषयइतिभाष्यंतदर्थश्चशक्तिपरिच्छित्त्यमहत्त्वमर्थमन्वामुरुपर्णासदृशौषधीत्वरहंत्रीतिअ
तिदेशवाक्यार्थज्ञानस्योपमितेःकार्यकारणभावपरिच्छेदकत्वमितिवदंति।अत्रचसादृश्यविशिष्टपिंडदर्श
नंकरणंउद्बोधकोतिदेशवाक्यार्थस्मरणंव्यापारउपमितिःफलं।अन्येअतिदेशवाक्यार्थधीःकरणंतदर्थस्म

नापिस्यनि: ॥ समानाकारानुभवसंस्कारपोरसत्वात् इति सिद्धं प्रमाणान्तरत्वं ॥ वाक्यमिति ॥
तच्च त्रिविधं विधिनिषेधार्थवादभेदात् ॥ क्रियागतेष्टसाधनताबोधकवाक्यं विधिः ॥ पचे-
नेत्यादि वाक्यं धात्वर्थं वाक्याहेतद्बोधकत्वनियमस्य मते अभिहितत्वात् लोकावाप्तिप्रसङ्गायानुपो-
४ध दनूपफलस्यार्थेन तद्बोधकत्वासंगतिः ॥ तत्र विधिश्चतुर्विधः ॥ उत्पत्तिविधिर्विनियोगवि-
धिरधिकारविधिः प्रयोगविधिश्चेति ॥ तत्र कर्मस्वरूपमात्रबोधको विधिरुत्पत्तिविधिः
॥ स च यथा आग्नेयोऽष्टाकपालो भवति सोमेन यजेतेत्यादिः ॥ ॥ देवताद्रव्यकर्मस्वरूप
बोधकत्वात् ॥ परार्थतया न्यविधिर्विनियोगविधिः ॥ यथा दध्ना जुहोतीति होमार्थ
तया दधिविधानात् अयं चापूर्वविधिर्नियमविधिपरिसंख्याविधिभेदात्त्रेधा ॥
विधिं विना कर्मापि प्रवृत्तिर्नोपपद्यते ऽसावपूर्वविधिः नियतप्रवृत्तिफलको २९
फलको विनिर्नियमविधिः ॥ स्वविषयादन्यत्रप्रवृत्तिविरोधी विधिः परिसंख्या
विधिः ॥ तत्र क्रमेणोदाहरणानि व्रीहीन्प्रोक्षति व्रीहीनवहन्ति इमामगृभ्णन् रशना राम

मादत्त इत्यश्वाभिधानीमादत्त इति ॥ तत्राद्ये व्रीहिं विना प्रोक्षणप्राप्त्यभावात् ॥ द्वितीये पुरोडा-
शनिष्पादकव्रीहिवैतुष्यद्वारा यागोपकारके च घातद्वयत्यपरिहारेण नखविदलनादिना-
पि प्रवृत्तिप्रसक्त्या प्रवृत्तिनियमो न स्यादिति तादृग्विधेः प्रवृत्तिनियमनिर्वाहात् ॥ तृतीये मं-
त्रस्य रशनाग्रहणप्रकाशकत्वेन यामंत्रलिंगेन गर्दभरशनादानेपि विनियोगलाभेन तदादानका-
लेपि मंत्रपाठापत्तेरेतद्विधितश्च प्राप्त्यश्वरशनाग्रहणे तत्मंत्रविनियोगेन नियताकांक्षनया
गर्दभरशनाग्रहणेन तद्विनियोग इति संगतिः ॥ फलसंबंधबोधको विधिरधिकारविधिः ॥ अ-
तश्च फलभोक्तृत्वसमानाधिकरणं कर्तृत्वमधिकार इति गीयते ॥ यथा ज्योतिष्टोमेन स्वर्गकामो यजे-
त्यपरे। कर्मस्वरूपं च द्विविधं ॥ गुणकर्मार्थकर्म च ॥ तत्र क्रत्वनुकारकास्माश्रित्य विहितं गुणकर्म तं त्वपि
चतुर्विधं ॥ उत्पत्त्याप्तिविकृतिभेदात् ॥ तत्र यद्र्थं तस्य तीयापंत क्षणेन संस्कारविशेषविशिष्टप्रयोग्यतेः
स्वस्वाध्यायोध्येतव्य इति तीयं ॥ अध्ययनेनाविद्यमानस्यैव स्वाध्यायस्य प्राप्तेः ॥ व्रीहीनवहंतीत्यादि
तृतीय ॥ अवघातादिना व्रीहीणां कृतेः ॥ व्रीहीन्प्रोक्षतीत्याद्यो चतुर्थं ॥ प्रोक्षणादिना व्रीहीणां संस्का-
रात् ॥ एतच्चतुष्टयमंगमेव ॥ एवं क्रत्वनुकारकोरापनाश्रित्य विहितं अर्थकर्मात च द्विविधं ॥ अंगंप्र-
धानं च । अन्यार्थं अंगं । अनन्यार्थं प्रधानं ॥ अंगमपि द्विविधं ॥ संनिपत्योपकारकमारादुपकारकं च ॥

तत्र प्रधानस्य स्वरूपकथकमाद्यं॥ फलोपकारि द्वितीयं॥ एवं संपूर्णांगमुक्तो विधिः प्रकृतौ॥ विकृतौ
त्वंगयुक्तो विधिर्विकृतिरिति संक्षेपः॥ क्रियायां बलवदनिष्टाननुबंधीष्टसाधनत्वाभावबोधकं वाक्यं निषेधवा
क्यं॥ यथा न कलंजं भक्षयेत् नातिरात्रे षोडशिनं गृह्णातीति॥ विधायकशब्दशेषं वाक्यमर्थवादः॥ [redacted]
॥ स च त्रिविधः॥ गुणवादोनुवादो भूतार्थवादश्चेति॥ तत्र कार्यकारित्वादिगुणेन
वादस्त्वादिवादो गुणवादः॥ यथा यजमानः प्रस्तर इत्यादिः॥ प्रमाणांतरेण निश्चितार्थकोनुवादः॥
यथा वायुर्वै क्षेपिष्ठेत्यादिः॥ उभयभिन्नोर्थवादो भूतार्थवादः॥ यथा स्वर्गापवादोयन्न दुःखेन संभिन्नं न
च ग्रस्तमनंतरं॥ अभिलाषोपनीतं च तत्सुखं स्वःपदास्पदमित्यादिः॥ कृतिसाध्यत्वेष्टसाधनत्व
बलवदनिष्टाननुबंधित्वानि विशिष्टान्यविशिष्टानि वा विध्यर्थ इति न्यायसिद्धांतः॥ भट्टास्तु लिङा
दिभिः धातुतत्त्वार्थं प्रवर्तकं॥ तथाहि॥ प्रवृत्तिः स्वेच्छाधीना॥ परेच्छाधीना च॥ तत्राद्या यादृष्टसाधन
त्वज्ञानं कारणं॥ अस्याश्चरमगुरुची॥ द राज्ञाप्रेषणादिधीः॥ तेषां च परनिष्ठप्रवर्तनाज्ञानत्वेन हेतुत्वे छा
॥ तथा च यजेतेति विधिप्रयोगेपि प्रवृत्तौ राजादिवद् विधेरेव प्रवर्तकः॥ आज्ञादेरेव तन्नवृत्तिकाभा
वेन लिङः निष्ठा प्रवर्तनाभिधाने पर्यवसितं न तु लं बाध्याः नादास्य संबंधेन॥ तन्न ते धर्मधर्मिणोरभे २९
दात्॥ वर्णानां नित्यत्वेन तस्या अपि नित्यत्वं सा च लिङ्ख्यापारूपमेव शाब्दी भावनेत्युच्यते॥ राम

आर्थी भावना च यत्नचेष्टादिसाधारणी प्रयत्नत्वेन वा आख्यातसामान्यवाच्या॥ उभयसाधारणं भावनात्वं
चांशत्रयवद्व्यापारत्वस्वरूपं इदं च न तत्प्रवृत्तिनिमित्तं तद्भान स्पर्शिकेन कथमिति कर्मकरणेति कर्तव्य
ताकांक्षा साफल्यं॥ तत्र आद्याया मेकं पदोपात्तत्वप्रत्यासत्त्या कर्मत्वेन अर्थभावना [redacted] रूपाश्रुतप्र
वृत्तिरेवान्वेति॥ प्रवर्तनात्वेन स्वस्मिन् लिङ्पदशक्तिग्रहः करणत्वेन आग्रहीतलिङ्पदशक्तिकस्या
प्रवृत्तेः॥ स्तुत्यर्थवादश्चेति कर्तव्यता॥ स च फलादावुत्कटत्वरूपप्रशस्तत्वज्ञानद्वारोपजायंते॥
बलवद्द्वेषमय नयन बलवदनिष्टाननुबंधित्वज्ञानद्वारोपयुज्यते॥ अस्यां च स्वर्गो भाव्यो यागः करणं क
यागकरणत्वं च फलोद्देशप्रवृत्तपुरुषकृतिविषयत्वं॥ प्रयाजादीति कर्तव्यता॥ बलवदनिष्टाननुबंधि
त्वज्ञानं च प्रतिबंधकं तदभावः स्वरूपसन्निवकारणं॥ आपरे पूर्वं क्रियागकरणकत्वबोधे यागे
फलोद्देशप्रवृत्तकृतिविषयत्वबोधेन तत्र कृतिसाध्यत्वस्याप्यवगमात्॥ न विधेस्तत्र शक्तिः॥
अधिकमन्यत्रानुसंधेयं॥ गुरवस्तु कृतिसाध्यताज्ञानं चिकीर्षाद्वारा प्रवर्तकं॥ न त्विष्टसा
धनत्वज्ञानं संध्यावंदनादौ पूर्वस्य नापत्तेः॥ एवं च विधेरपि तत्रैव शक्तिः॥ चिकीर्षा च कृ
तिसाध्यत्वप्रकारिका॥ धर्मिणी च रेष्ट॥ तया च तत्तद्धर्मावच्छिन्नसाध्यकप्रवृत्तिसाध्य

छिन्नं प्रति तत्तद्धर्मावच्छिन्नविशेष्यककृतिसाध्यत्वज्ञानं हेतुः एवं तत्तद्धर्मावच्छिन्नविशेष्यककृतिसाध्य
त्वप्रकारकेच्छां प्रति तत्तद्धर्मावच्छिन्नविशेष्यककृतिसाध्यताज्ञानं हेतुः संवादिच्छायाः स्वप्रकार[illegible]प्र
कारकधीसाध्यत्वनियमात्। चिकीर्षाभिन्नेच्छायां च सुखत्वदुःखाभावत्वज्ञानपाकोऽभवत्विति इच्छा च न भ
वत्येव तन्मते अत एवालसे दृष्टसाध्ये सुखेऽपीच्छा दृष्टिमपि विषयीकरोतीति तिमणिकारेण। न चेष्टसा
धनताज्ञानस्याहेतुत्वे नि[illegible]फलतयाज्ञाने चैत्यवंदनादावपि प्रवृत्तिः न च तदानीं श्वस्तनभाविन तत्का
लीनतत्पुरुषीयं प्रतिकारणीभूततत्कालीनतत्पुरुषीयकृतिसाध्यताज्ञानस्य विरहादेव न प्रवृत्तिः तन्मी
तेः स्वथारव्यास्वभावादितिवाच्यं। गुरुतरभोरोत्तलनादौ कृत्यसाध्येऽपि संवादेच्छाप्रवृत्त्युपपत्तेः पेक्षायामा
नतादृशकृतिसाध्यत्वासंसर्गाग्रहस्यैव हेतुतायाः स्वीकर्तव्यत्वेन तत्र भ्रमात्प्रवृत्तेर्दुर्वारत्वादितिवा
च्यं। यतः फलविशेषोद्देश्यकप्रवृत्तौ एककालावच्छिन्नसामानाधिकरण्यसंबंधेन बलवदनि
ष्टाननुबंधित्वविशिष्टसाधनताज्ञानविशिष्टज्ञायमानेदानींतनतादृशकृतिसाध्यतासंसर्गाग्रह
त्वेन हेतुकत्वं। अत एव च विषमक्षणेऽपि न प्रवृत्तिः।। इष्टसमेवेष्टसाधनत्वज्ञस्य परक्षणकालीनका ३०
र्यतास्मरणतज्ज्ञातमात्रबालस्य स्तनपानादौ प्रवृत्तिश्चोपपन्ना भवति।। ज्ञानं सामान्यसामग्र्या
स्तन्मतेवर्त्तमानकालभासकत्वस्वीकारेणास्येदानींतनत्वविषयकत्वोपपत्तेर्न्याः तरानुभवस्य राम

इदानींतनत्वानवगाहित्वेऽप्युपपत्तिः।। फलानुद्देश्यकप्रवृत्तौ च नित्तत्कालजीवितप्रतिसंधाना
वच्छिन्नकार्यताज्ञानत्वेनैव हेतुता नित्यत्वज्ञानमपि सहकारि तेन शुचिनकालजीवित्वप्रति
संधानजन्यकार्यताज्ञा[illegible]नात्तन्निष्फलत्वेन ज्ञायमानचैत्यवंदनादौ प्रवृत्तिः।। तत्रा
पि निसृत्वासंसर्गाग्रहत्वेन विशिष्टवैसिसिस्स मास्यः संकेत भिन्नायाम भिधायां मानाना
भावात् स्वबाधीनप्रवृत्तौ कुप्रकारणताकेष्टसाधनताज्ञानादेव प्रवृत्त्युपपत्तेः इष्टाज्ञा
दिज्ञानस्येष्टसाधनत्[illegible]ताज्ञानद्वारा प्रवृत्तिप्रयोजकत्वादाधर्मतं नियुक्तिकमेव। चरम
मपीष्टसाधनताज्ञानावच्छिन्नकार्यताज्ञानत्वेन कार्यताज्ञानावच्छिन्नेष्टसाधनता
ज्ञानत्वेन च विनिगमना[illegible]विरहेण कार्यकारणभावकल्पनेन बलवदिष्टाननुबंधित्व
ज्ञानमादायापि विनिगमनाविरहेण कार्यकारणभावानंत्यात्। कार्यतावच्छेदकगौरवे
स्य च दुर्वारत्वात् शुचितकालजीवित्वप्रतिसंधानादेश्चावच्छेदककोटिनिवेशेन नि
त्यत्वज्ञानादेः कारणताकल्पनेन न[illegible]यमेव परं। चिकीर्षा कृतिसाध्यत्वप्रकार
केच्छा तथा च समवायसंबंधेन पाकत्वावच्छिन्नविशेष्यककृतिसाध्यत्वप्रकारके

ऽप्रतीतत्दवच्छिन्नविशेष्यककृतिसाध्यत्वप्रकारकज्ञानत्वेनजनकता। इष्टानीलत्वनत्वंमदीयत्वंचकृतौविशे
[redacted] षणंतेनबालस्यनयौवराज्येप्रवृत्तिः। नन्वन्यदीयकृतिसाध्यताज्ञानेप्रवृत्युदयेनव्यभिचारः
एतदंतर्भावेनविधेःश्रुत्यभावेपितन्मूलकोऽनुमानसतादृशबोधस्यैवप्रवृत्त्यादिजनकत्वं। यदाहुम
कारः। विधिजन्यज्ञानजन्यंज्ञानंप्रवर्त्तकमितिकृतिश्चप्रवृत्तिरूपा। अतोज्ञोवनयोनिकृतिसाध्ये
प्राणपंचकसंचारेनप्रवृत्तिः। नचकृत[redacted]साध्यताज्ञानस्यचिकीर्षाप्रवृत्तिबंधकत्वकल्पनयैवोपप
त्तौकृतिसाध्यताज्ञानस्यकारणत्वंकिमर्थमितिवाच्यं तस्यप्रतिबंधकत्वेनदभावस्यकारणत्वेगौर
वात्। अनुपस्थितकृतिसाध्यत्वप्रकारिकेच्छापाऽनुभवसिद्धत्वान्नतत्प्रकारकज्ञानकारण
त्वस्यावश्यकत्वात्तद्रूपाकत्वावच्छिन्नविशेष्यकेष्टसाधनज्ञानस्यतुकृतिसाध्यत्वप्रकार
कतदप्रकारकेच्छासाधारणपाकत्वावच्छिन्नमुख्यविशेष्यकेच्छात्वमेवजनकतावच्छेदकं॥
सामान्यसामग्रीवविरहादेवके[redacted]वलकृतिसाध्यताज्ञानकालेनचिकीर्षाप्रवृत्त्यापत्तिः॥
मुख्यत्वनिवेशाच्चनपाकसाध्यसुखत्वादिप्रकारकेच्छायांव्यभिचारः। समभिव्याहृतपदो ३१
पस्थापितकामनाविषयतावच्छेदकावच्छिन्नसाधनत्वएवाविधिप्रत्ययस्यशक्तिः॥ अन्य राम

स्वर्गकामोयजेतेत्यादितःनात्पर्यंप्रमादिष्टानरकसाधनत्वेवोधप्रसंगः। तथाचविश्वजितायजेतेतिवदहरहःसं
ध्यामुपासीतेत्यादावपिफलकर्मकत्वकयत्राध्याहारः। सचनरकनिवृत्तिब्रह्मलोकावाप्तिकामइत्याकारः। नि
त्यकाम्येनिष्फलनिवृत्तिसंवलिततत्तत्फलकामयवाधिकारीसमुच्चितफलकामाधिकारिणांएकैकफलका
मनासहकारेणापितत्कामनाविषयफलजनकत्वोपगमात्त्वप्रसवायकफलद्विरोषोमात्रेणमु
मुक्षूणांतत्तत्कर्मानुष्ठानोपपत्तिः। श्रुचिनाकरणिप्रत्यवायइत्यत्रैवनिंदार्थवादतात्पर्येणकामनाश्र
त्यंशोचादिमतोसंध्यावंदनापकरणेप्रत्यवायापत्तिः। त्रिकालसत्त्वपाठादाविवकामनासद्भावनैयत्यसकल्पनाद्धा।
एवंचग्रहणश्राद्धादेर्नित्यत्वनैमित्तिकत्वेऽप्यसंध्यावंदनादेर्नित्यत्वकाम्यत्वेऽङ्गीकरणीयेदृष्टं। वेदानांतनेच्छाविषयत्वः
तेनतत्स्यभोजनेनप्रवृत्तिः। इच्छाविषयत्वंचस्वरूपसदेवनतुतद्देशेतत्ज्ञानमपेक्षितं। [redacted]तथासतिफलस्यासि
द्धत्वेच्छाविरहपिरपिइष्टत्वज्ञानसंभवात्सिद्धौदनादेरपिउपायेच्छाप्रसंगः। उपायेच्छायांफलेच्छायाअपिहे
तुतावोध्यापरस्यरसहचारेण। चानयोःकार्यकारणत्वं नचसाध्यत्वसाधनत्वयोर्विरोधः तयोरेदाएकत्र
सत्वरूपविरोधेपिएकत्र[redacted]कालरूपावच्छेदकमनंतर्भाव्यैकधर्मिणएकज्ञानेनाप्यवगाहनेवाधकाभावा
त्॥ इष्टंचसुखदुःखाभावोवासाधनत्वंचक्षेमसाधारणंतेनकृत्नुविनाशादेरपिदुः[redacted]खाभावसा

धनत्वात् द्वेषो चेरेच्छाप्रवृत्तीमधुविषसंपृक्तान्नभक्षणादौ रु प्रवृत्तेरनुदयात्। बलवद्द्वेषविषयानुबन्धकत्वस्या
नुस्यहेतुनास्वीकार्यो बलवत्वं च द्वेषगतो जातिविशेषः। तन्नियामकं च सामग्री। अननुगतेवर्तते नैक
स्यैव पुंसः कदाचिद्द्वेषोत्कटोऽनुत्कटश्चोपपद्यते तदभावादेव चराणां धस्यापि नरकगोचरद्वेषसत्वेपि
अगम्यागमनादौ प्रवृत्तिः। इष्यमेव च इष्ये तेनाभिन्यवस्य ञ्जते त्यादौ प्रवृत्तिः। मणिकृतस्तु इष्ये ना
दौकृतिसाध्यत्वेसपि इष्टसाधनत्वमेव योग्यताऽन्वेति। ननु बलवदनिष्टननुबन्धित्वमपि योग्यत्वा
विरूचिरे। एतद्रूपादेवप्रत्ययेकशक्तिरिति गम्यते। अन्यथा पदार्थः पदार्थे नान्वेति॥ न तु पदार्थैकदेशे
नेति व्युत्पत्तिविरोधात् असंगत्यापत्तेः। वस्तुतः इष्ये न त्व सामानाधिकरण्ये न बलवदनिष्टाननुबं
धित्वस्यान्वयात् विधेरप्रामाण्यं। अतनापि वधफलकस्य श्येनस्य बलवदनिष्टाननुबन्धित्वादि
ति उत्कटानुत्कटदुःखविषयकसमूहालंबनद्विषानंगीकारान्नांशिकत्वं। अत्रापि इदानीं तनत्व
निवेशादृष्टे तस्य विषभक्षणे प्रवृत्त्युपपत्तिः। नकलंजभक्षयेदित्यत्र च विध्यर्थे बलवदनिष्टान ३२
नुबंधित्वाभाव एव बुध्यते। कलंजभक्षणस्य च कृतिसाध्यत्वात् इष्टसाधनत्वाच्च दध्यादन्नरसः
श्राद्धं पितृभ्यः प्रीतिमावहन् इति स्मृतौ व्यधिकरणाया अपि पितृतृप्तेः फलत्वोक्तेः स्वादुदे राम

श्यत्वसंबन्धेनापि यागादेः फलं प्रतिकारणत्वं कल्प्यते। यथा श्राद्धादावप्येवमेव अत एव
वृष्टान्त्यादेरपि तत्फलमनुष्ठातरीत्युत्सर्ग इति प्राचीनवादः। पितॄणां मुक्तिस्तु स्वस्वर्गादिः फ
लं यावत् स सन्नैमित्तिकानुष्ठानस्य सामान्यतः स्वर्गफलकत्वात्। तदधिष्ठातृदेवतां तत्रा
प्तिर्वा पितृत्रे वेनामेव उपचारेण तेषां मन्ति वोध्यात्। अत एव वसुरुद्रादित्यस्वरूपाणां
पितृपितामहप्रपितामहानामिति साधु संगच्छते। साधनत्वं च साक्षात्परम्परासाधारणं
खंडोपाधिः पदार्थान्तरं वा। नातत्र यागोदेशः भु विनाशितु यागकालान्तरभाविस्वर्गादेसा
क्षात्संभवतीति तदुपेक्षायां दृष्टाभावे दृष्टं कल्प्यते इति न्यायसिद्धोऽतः। व्यापा
मे वत्तल्लिङ्गदेहीति गुरवः। तथाहि। तत्कर्मकृतिसाध्यत्वान्वये तत्कामनाविषयसा
धनत्वं योग्यता। अन्वयप्रयोजकरूपस्यैव योग्यतात्वात्। अन्यथा कामप्रवृत्तिपरा
तुः स्वर्गकामो यजेतेति वाक्यात् प्रवृत्तिनिवर्तकं कार्यताज्ञानं वाच्यं तत् पा
के पि संभवति स्वर्गकामो यजेतेतिवत् स्वर्गकामः पचेतेत्यादिवाक्यस्यापि प्रामाण्य

प्रसंगात् तु सामान्यभानस्य किंचिद्विशेषत्वभानेने प्यत्वेन साक्षात्साधनत्वबाधे परंप
परासंबंधत्वं वाच्यम् तत्र च न तद्घटकापूर्वोपस्थितिं विनेति तद्वाच्यतावश्यकत्वं। न तु व्यता
च कार्यत्वेन तस्य विषयत्वोपगमो तु याग्रस्य तत्र विषयतया स्वर्गकामस्य च नियोज्यत्वेनान्व
यः। तथा च दैयागविषयकं स्वकाम नियोगिकं कार्यमिति धीः नियोज्यत्वं चं कामनाविशि
ष्टस्य मनेदं कार्यमिति बोद्धृत्वं। बोद्धृत्वं च प्रयोजकत्वं तेन कामनायामपि अन्यथा
तथा विशेषणत्वानुपपत्तेः। विशेष्यान्वयि न एव विशेषणत्वात्। विशेषणत्वसंभवे न
पलक्षणत्वस्यान्याय्यत्वात्। तथा च कामनायास्तादृशबोधप्रयोजकतानसाक्षात् किं
तु स्वविषयसाधनताधीद्वारेति। न तद्विशेषसाधनीभूतयागविषयककार्यकृतिसाध्यमिति
धीः। नद्यपूर्वकृतिसाध्यत्वं क्रियमद्वारीकृत्य तियागे कृतिसाध्यताधीः। न चापूर्वस्य
मानान्तरानुपस्थायकत्वात् अनुपस्थितेः कथं शक्तिधीरिति वाच्यं कार्यं शक्तो
विधिरिति कार्यत्वेन प्रकारेण घटादि विशेष्यकशक्तिग्रहस्यैव संभवात्। समान प्र
कारकत्वेनैवादि शक्तिग्रहशाब्दबोधयोः कार्यकारणभावांगीकारात् तु समान

विशेष्यत्वेनापि। न च विधेः कार्यत्वे शक्तिः कृपतया धर्मिणि लक्षणेवास्तु कृतं शक्त्येप
विवाच्यं। तन्मते लाक्षणिकस्यानानुभावकत्वेन विधेरपूर्वांशे प्रामाण्यानुपपत्तेः। त
था चेष्टसाधनीभूतो यागः स्वर्गकामकृतिसाध्य इति तन्मते चरमो बोधः। अप्रतिज्ञनकाभा
वमेव बोधः इति तद्धेतुः। अन्वयप्रयोजकरूपयत्नयोग्यताकं किं तु बाधकप्रमाविरहो योग्यता
आवश्यकत्वात्। सा च स्वरूपसती हेतुः। न चापूर्वस्यानुपस्थितौ कथमिष्टसाधनतान्वयबो
धः। सामान्यभानस्य किंचिद्विशेषनियतत्वादिति वाच्यं। सामान्यतसाधनत्वे [illegible] त्वेनेष्टसा
धनत्वस्य भानात्तस्य च साक्षात्त्वे संभवे परंपरितस्य भानं परंपरासाधनत्वेन भाने त
द्घटकापूर्वेपि स्थितेरावश्यकत्वं न तु सामान्यरूपेणाप्यप्रतीतस्यानुपपत्त्या तु त्वतत्क
ल्पनमिति तु समासः। अदृष्टस्तु पञ्चैकमेव प्रधानांगसाहितात्तस्माद्दृष्टस्य पूर्वं तेतेन
च सर्वं विधियेते न परमापूर्वमिति दृः। प्र वैदर्शपूर्णमासयोस्तु पक्षद्वयं व्यक्तिभ्यो समु
दायाभ्यां युगपत्फलापूर्ववादिं मायो गारदके कं प्रति समुदायापूर्वं कल्प्यते। तत्कथं

भावापेक्षायामग्न्यन्वाधानादिंगोपदेशः। ततः पूर्ववदेकांगसहिते भ्यस्तद्दुत्पत्तिर्नसंभव
तीतिप्रतीतिस्त्रिकं त्रीणित्रीणिपुत्रस्य पूर्वाणि। तस्मादेकमेवपूरमपूर्वमितिनवापूर्वाणीतिवद
न्ति। तत्सागप्रधानापूर्वद्वये प्रमाणाभावात्त्रयं दिङ्कलिकापूर्वैरेवपरमापूर्वजननं
संभवात्। नचपौर्णमास्यां पौर्णमास्या यजेतामावास्यायाममावास्ययायजेतेति नि
वाक्यसद्भये समर्थः पदविधिरिति सूत्रस्य पदत्वसंपादके विधिः पदविधिः। सामर्थ्यं चैत
त्तैरपेक्ष्यनूपमित्यर्थकत्वेनकर्तृकरणयोस्तृतीयैस्यापिपदविधित्वेनतत्रार्थत स
स्यापक्षित्वेतेननिरपेक्षसाधनतायामनुशिष्टयात्तृतीयाश्रुत्यातिकस्य त्रिकस्या
न्यनिरपेक्षत्वावगमेन तस्यान्यान्यासापेक्षांगत्वपादियागत्रिककुसाध्यपरमा
पूर्वसाधनत्वासंभवात्। तदावतूपकत्वेति वाच्यं। समर्थः पदविधिरितिसूत्रस्यसुप्ति
ङन्तपदविधिविधिविषयत्वेनैतद्विषयाभावात्। एकार्थीभावरूपस्यसापेक्ष्य
स्यैकशास्त्रस्य महाभाष्यकारादिभिरनभिप्रेतत्वाच्चेपूर्वोक्तार्थकत्वेदं तेन च क्रोणघटं क

रोतीत्यादीनामसाधुतापत्तेस्तयोर्निरपेक्षसाधनत्वाभावात्। सतृतीयेतरनिरपेक्षत्वमित्युक्तौ तु तं
तुनापठंकरोतीत्यादेस्साधुतापत्तेः। कुंभकारः गार्ग्य इत्यादौ कृत्तद्धितविध्योः प्रकृतिप्रत्यययोः प
दत्वसंपादकत्वाभावेनैकार्थीभावानापत्तेश्च व्याकरणविधिमात्रस्यैवपदत्वसंपादकत्वेनव्या
वस्थाभावाच्चेत्यलं। समस्तासमस्तवाक्यं द्विविधं। समासः षड्विधः। सुबंतस्य सुबंतेनातिङंतेन
नप्रातिपदिकेन धातुना। अथ तिङंतेन तिङंतेन सुबंतेनचेति क्रमेणोदाहरणानि। तत्पू
र्वः। अनुव्यचलत् कुंभकारः कटप्रूः पिबतखादत दहिजोस्कु। तद्धितसुपासुपातिङा नाम्नाधातुना
प्यतिङंतिङासुबंतेनेति विलेपः। समासः षड्विधो बुधैरीरितः। समासत्वं चैतदन्यतमत्वम्। अ
व्ययीभावतत्पुरुषबहुव्रीहिद्वंद्वा द्विसंज्ञाः। अथैतदन्तर्गताः। तत्रापि तत्पुरुषविशेषः क
र्मधारयः। तत्पुरुषाः समानाधिकरणः कर्मधारय इत्युक्तेः कर्मधारयविशेषो द्विगुः सं[redacted]ख्यापूर्वो द्विगुरित्यनुशासनात् तल्लिनार्थविषयेउत्तरपदे परतः समाहारे चाव्ये
यः संख्यापूर्वः समासः द्विगुरितितदर्थः। अव्ययीभावत्वस्य विकारविहितत्वमव्ययीभावत्वं
तत्पुरुषत्वं चतत्पुरुषे इत्यधिकारविहितत्वं। कर्मधारयत्वं तत्पुरुषत्वेसतिसमस्यमान

द्बोधकत्वं सत्त्वेतेन बहुव्रीहिनिरासः। तत्पुरुषत्वे सति संज्ञाविषयत्वे ऽसति संख्या
वाचकपूर्वपदकसमानाधिकरणनामसमुदायत्वं द्विगुत्वं। पूर्वसत्त्वेनेन बहुव्रीहेरप
रसत्त्वेतेन त्रिकष्टपंचषट्कमित्यादिकर्मधारयनिरासः। शेषो बहुव्रीहिरित्यधिकार
चिह्नितत्वं बहुव्रीहित्वं। परास्यरान्वय्यर्थकानेकपदघटितसमासत्वं द्वंद्वत्वं। उपकुम्भ
मित्याद्यव्ययीभावः। कुंभपदलक्षणया कुंभसमीपइत्याद्यन्वयबोधः। राजपुरुषइत्या
दितत्पुरुषः। राजपदं राजसंबंधिलक्षणया राजसंबंध्यभिन्नः पुरुषइत्यन्वयबोधः। रा
उसंबंधश्च लक्षणेति मणिकृतः। नीलोत्पलमित्यादिकर्मधारयः। तत्र च नीलपदस्य
गुणिपरतया नीलगुणवदभिन्नमुत्पलमित्याद्यन्वयबोधः। पंचकपालइत्यादि
द्विगुः। कपालपदस्य पंचाभिन्नकपालसंस्कृतेलक्षणया पंचकपालसंस्कृतइत्या
द्यन्वयबोधः। चित्रगुरित्यादिबहुव्रीहिः। तत्र च गोपदस्य चित्रगोस्वामिलक्षक
याचित्रगोस्वामीत्याद्यन्वयबोधः॥ धवखदिरौ पाणिपादमित्यादिर्द्वंद्वः। अत्र

चप्रकृत्यर्थमात्रबोधः। अधिकं मुक्तावलीप्रभायां पर्वे विचयिष्यामः। यत्तु विभक्तिशून्यपूर्वप
दकनामसमुदायत्वं समासत्वमिति तन्न कण्ठेकालइत्यादावलुक्समासाव्याप्तेः। विभ
क्तौ आनुशासनिकलोपाभाववविशिष्टान्यत्वनिवेशेऽपि अनुव्यचलतु पवत्तरवादत्तत्र हि डो
मित्यादाव्याप्तेः। नामसमुदायत्वाभावात्। इष्टापत्तौ तु तत्र सुक्स्वरादिकार्यानापत्तिः अत
एव याद्दशमहावाक्यान्तरस्त्वतत्वादिः स्वार्थस्य याद्दशार्थविच्छिन्नविषयताशालिबोधोहे
तुः ताद्दशोऽतद्रूपत्वं तथा विध्यार्थसमास इति परास्ता। विधेयेत्यादौ अव्याप्तेश्च इष्टापत्तौ त्स्य बा
धादेशानापत्तेः। पदं विधिनियमऽइति। ब्राह्मणोऽर्धपिप्पलीत्यादौ ब्राह्मणाभिन्नः पिप्पल्यर्ध
मिति पूर्वपदार्थविशेष्यकबोधजनकत्वसत्वादिति। तदपि तु द्विगार्ग्यसमंगं गामुनस्तंगं
गमित्याद्यव्ययीभावेऽव्याप्तेः अत्र हि पूर्वपदलक्षणया पार्श्वपोऽद्रोगार्ग्योसमाहृतोऽस नगं
गाधिकरणमित्यादिबोधात्। तत्र तद्भावे तत्प्रयुक्तस्वराद्यनापत्तेः। नचेष्टापत्तिः। नचा
नेकनर्धारय। समभेदाद्यं मपि बहुव्रीहिस्वीकारादिति ग्रंथविरोधात्। न च स्वरादिका

र्थप्रयोजकमन्यदेवबुद्धितिवाच्यं। तदनिरुक्तेः सर्वसाधारण्येन [redacted] इक विसेवनिर्वा
हकहृत्केरीति ऽागस्तिलेनाप्यमानत्वात्। लौकिके प्रयोगे विभक्तिलावच्छेदेन वैरूप्याभाववत्ता
मेकशेषोविधीयते वैरूप्यं च स्वरूपवतोर्थतो वा विभक्तिश्च सारूप्ये उपलक्षणं तेन विभक्त्यु
त्पत्तेः पूर्वमेवार्थद्वारकत्वेन एकशेषस्य स्वकर्मणा थेद्वयोपस्थितिः। अर्थतन्त्रैवैकस्मात्स्व
शब्दाद् गपदर्थद्वयोपस्थितिसंभवात्तु शब्दभेदः। एकशेषेतु एकोनुसंहितः अपरः श्रूय
माणः शब्द इति भेदोवसेयः। यद्वृत्तरंपः प्रत्ययोनुविष्टः स तद्वृत्केतरविशेषणतार्थंगतस्वार्थबोधः इत्यत्र
प्रत्ययानां प्रकृत्यर्थान्वितस्वार्थबोधकत्वमिति व्युत्पत्तेस्त्रीत्वसंख्यादि [redacted] वि [redacted] स्यादौ धेवादेः
प्रकृतित्वाभावेपि नक्षतिः। इतराविशेषणत्वे तेराजपुरुष इत्यादौ राज्ञि विभक्त्यर्थान्वय इति समा
सः असमस्तवैत्रः तंडुलं पचतीत्यादितत्रहि तंडुलादिपाकक्रियाकारके कंवंच पाकक्रियाकर्त्र पाकक्रियाकारक २
कर्मादिघटयान्यत्वं। एवमन्यत्रापि। चैत्रपदोत्तरप्रथमायाः संख्यामात्रमर्थः॥ परिभाषाविषय
त्वोद्देश्यैकवचनत्वादिनैकत्वादौ शक्तिः॥ इदं च सुपि इङ् भ्यामे कर्म [redacted] वेकसंबोध्य

तेषां भेदे स्यात वैष्यर्थ्याभावादिति। प्रथमायाश्चावश्यकत्वार्थकत्वमपिपितरस्ति संतीत्यादौ प्रथमासाधुत्वात्। कृचित्सं
बोध्यत्वमपि वचनोद्देश्यत्वरूपं तत्र चलक्षणायुगपद्वृत्तिद्वयविरोधे प्रमाणाभावेनयुपगादेकत्वसंबोध्यत्व
योर्भानेबाधकाभावः। कर्तृत्वं चाख्यातार्थः। सामान्यतः कर्तृत्वं च कृतिरेव। पाकविषयक। पाकानुकूल
कृतिमत्वं च पाक [redacted] कर्तृत्वं। धात्वर्थक्रियायाविषयत्वानुकूलतान्यां आख्यातार्थकर्तान्वयः। ते
नकूपकर्त्तुर्दुर्बलस्याचनरोगो वधगुरुभारोत्तोलनकर्तृत्वं। कूपखननानुकूलकृतेर्गोवधानुकूलस्यापिगो
वधविषयकत्वविरहात् दुर्बलकृते भारोत्तोलन [redacted] विषयकत्वेपितदनुकूलत्वाभावात्॥ वैयाकरणानां
धात्वर्थव्यापाराश्रयत्वं कर्तृत्वमाहुः केचित्तु यद्धात्वर्थ [redacted] ख्यातेनयगाधसमभिव्याहृतेनयद्धा
त्वर्थान्वितयत्धर्मवत्त्वं बोध्यते तधर्मवत्त्वमेव तत्क्रियाकर्तृत्वं पचतीत्यादौ पाकानुकूलव्यापा
रवत्वादिपाकादिक्रियाकर्तृत्वं पच्यते तंडुलइत्यादौ तंडुलादेर्वारणाय यगाद्यसमभिव्याहृतेति। वैय्या
करणमतपरिष्कृतं नितरदसत्। पच्यते स्वयमोदनः स्वयमेवेत्यादौ वैय्याकरणमतसिद्धस्य कर्तृ
त्वस्यानापत्तेः॥ पचतितंडुलं चैत्रेणास्मत्र चैत्रस्य कर्तृत्वापत्तेश्च। कर्मत्वं द्वितीयार्थः॥ क
र्मद्वितीयेत्यपिभावप्रधानो निर्देशः। तत्त्वपरसमवेतत्क्रियाजन्यफलशालित्वं

तत्र क्रियापदधातुलभ्यत्वाद्व्यापारशालित्वयोश्च संसर्गमर्यादया लाभात् फलमात्रं द्वितीयार्थः
गमिस्यजिप्रभृतीनाम् क्रियायाः समानमर्थः। फलविशेषान्वयबोधे धातुविशेषजन्यव्यापारो पचि
तेर्हेतुतया तत्त्वात् परस्वाप्यव्यापारे तत्फलविशेषजनकत्वमप्रतीयते न तन्यत्वाद्द्वितीयादर्गम्या
द्युपस्थितव्यापारस्य च फलान्वयबोधकत्वाच्च न ग्रामं स्पंदत इति प्रयोगः। घटं यतत इत्या
दिवारणाय द्वितीयादेर्विषयत्वादिबोधके आदिसमभिव्याहारस्यैव फलविशेषबोधे
गम्यादिसमभिव्याहारस्यैवाकांक्षात्वात्। कर्मप्रत्ययासमभिव्याहृतगमनादिपदस्य तत्त
त्फलावच्छिन्नव्यापारे अनादिनासर्थकत्वेनान्वेकार्थतात्पर्येण ग्रामातिकान्तो स्वारसिको
नयामगमन्नादिपदप्रयोगः। अनादितात्पर्ये स्वैरसिकप्रयोगनियामकत्वात्। ग्रामा
देः शिवस्वस्याप्रिकर्मत्ववारणाय परसमवेतेति द्वितीयार्थफलेऽव्यक्तं न त्रन्वयः। तद्धि लिखा
वच्छिन्नभेदवत्समवेतत्वं। प्रकृतार्थस्य ग्रामादेः प्रत्ययार्थफलेऽव्यक्तित्वसंसर्गेणान्वयः तथा च
ग्रामभिन्नसमवेतग्रामवृत्तिसंयोगजनकव्यापारानुकूलकृतिमानिति सन्वयबोधः गोपर
योदोग्धि मैत्र इत्यादौ गोवृत्तिविभागजनकपयोवृत्तिक्षरणानुकूलव्यापारः कर्तृबोधः यथा

राम

देः साक्षात्क्रियालभ्यफलशालित्वाभावेन गौणकर्मत्वं अकथितं चेति सूत्रस्य विषयः एवघटं
जानातीत्यादौ विषयत्वादिरूपं तद्विति कर्तृकरणयोस्तृतीयेत्यनुशासनात् कर्तृकरणत्वे तृ२
तृतीयावाच्ये। कर्तृत्वं चैव कृत्याश्रयत्वं करणत्वं व्यापारवत्त्वे सति असाधारणकारणत्वं। क्रियद्द
दिक्रियानिरूपितं परस्मैपदेभ्यः तेऽर्थाः साधुत्वे सतः पदादौ विशेषणत्वं तृतीयार्थः। तत्राश्रयत्वं रूपं
केचित्तु कारणत्वमपि। [redacted] अन्नेन वसतीत्यादौ अन्नहेतुको वसतीत्यर्थः। केचित्तु
दोपि धात्वर्थेन धनवानित्यादौ धात्वर्थेऽभेदेनैवान्वितिरिति तदर्थः। केचित्तु कोरे धात्विस्य
रूपाद्यर्थः। अक्ष्णा काणः मुखेन त्रिलोचनः इत्यादौ [redacted] नेत्रकोर
णत्वं चक्षुःसम्बन्धिकत्वे सत्यपि स्वसति चक्षुष्मत्त्वे तथा चाक्षि विकारवान् इति बोधः। अक्षि
पदं लक्षणपरं। चतुर्थी संप्रदाने इति सूत्रानुशासनात् संप्रदानत्वं तदर्थः। तच्च विज्ञाती
यक्रियाजन्यफलभागित्वेनोद्देश्यत्वं। तथा च त्यागजन्यफलभागित्वप्रकारकब्राह्मणव
दुद्देश्यताकगोविषयकत्यागानुकूलकृतिमानिति बोधः ब्राह्मणाय गां ददातीत्यादौ निष्कर्षः॥
त्यागेऽवैज्ञात्यं निवेशनीयम्। केतुः संप्रदानत्वं वैजात्यं तत्प्रयोगगम्यं। वृक्षायोदकमासिंचतीत्य

त्रैमेकजन्यप्रत्रैमेकजन्यफलभागित्वेनोद्देश्यत्वं स्वादेः। तथा च रक्षीयदेश्यकत्वेचनविषयक
कृतिमानिति बोधः नारदाय रोचते कलह इत्यादौ चतुर्थ्या वृत्तित्वमर्थः। तेन नारदीयरुचिवि
षयः कलह इति बोधः। वेश्याय श्लाघते धारयतीत्यत्र पुनर्दानमंगीकृत्य ग्रहणं धारणं तेन वेश्यीय
ग्रहणकर्मकं तादृशग्रहणाश्रय इति बोधः। विप्लवेन मद्यस्वस्वाधीकोत्कर्षवत्तया ज्ञापनं न
मस्कारः। ज्ञानानुकूलपि विषयित्वं चतुर्थ्यर्थः। तथा च विष्णुविषयकं यत्स्वावधिकोत्कर्षवत्त्व
ज्ञानं तदनुकूलो मदीयो व्यापारः। व्यापारेव तृ निष्ठः प्रतीयते। नमस्करेण तीत्यादौ तु
कर्तृत्वनिष्ठ इति विवेकः। अग्नये स्वाहा पित्रे स्वधा इन्द्राय वषट् इत्यादौ तु देयत्वं चतुर्थ्यर्थः। स्वा
हेत्यादीनां त्यागोऽर्थः। तथा च वह्निदेश्यकत्यागविषयः इदमिति बोधः। अपादाने पंचमीस
नुशासनादपादानत्वं पंचम्यर्थः। तच्च भेदो विभागश्चावृत्तित्वं प्रतियोगितावच्छेदकत्वेन
नकत्वं च संसर्गः। तथा च वृक्षाद्वृत्तिभेदप्रतियोगितावच्छेदकवृक्षवृत्तिविभागजनकपतना
श्रयः पर्णमिति वृक्षात्पर्णं पततीत्यत्र बोधः। व्याघ्राद्बिभेतीति दस्युतस्करः शत्रुतो वारय

तो वारयतीत्यादौ जन्यत्वं पंचम्यर्थः [redacted]। व्याघ्रजन्यभयाश्रयः इदं जन्यो यः शत्रुजन्यभया
भावानुकूलव्यापारवानिति बोधः। कूपादंधं वारयतीत्यत्र पंचम्याः पतनं द्वितीयायाः वृत्तित्वं धा
तोश्च प्रतिबंधानुकूलो व्यापारः। तथा च अंधवृत्तिर्यः कूपपतनप्रतिबंधः तदनुकूलव्यापारवा
निति बोधः। यत्तु यत्कूपेपतनमप्रसिद्धत्वं तेनान्वयसंभवादिति तन्न अनादरात् कूपस्येवाप्रसिद्धेः। विषा
न्मित्रं वारयतीत्यत्र वृत्तित्वं पंचम्यर्थः। द्वितीयायाश्चानुयोगित्वं अभावो वा नुकूलव्यापारश्च
धात्वर्थः। तथा च विषवृत्तिभोजनसंबंधावधाविच्छिन्नप्रतियोगिताकमित्राभावानुकूल
व्यापारविषयकफलवानिति बोधः। विषयवृत्तिमित्रकर्तृक भोजनविषयत्वाभावानुकूलकृति
मानिति बोधः। द्वितीयायाः कर्तृत्वं विषयत्वं धातोश्च भोजनाभावो व्यापारश्चार्थः। हिमवतो
गंगा प्रभवतीत्यत्र पंचम्याः संयोगो बहिःत्तरत्वं धातोश्च [redacted] घमूखंडसंबंधः तथा च हि
मवतः घमूखंड संबंधाश्रयवती गंगेत्यन्वयबोधः। सप्तम्या आधेयत्वमर्थः नत्वधिकरण
त्वं। तथा [redacted] सति भूतले न घट इत्यादौ न त्वयाभावाभावान्वयबोधानापत्तेः निरूपितत्वं तत्त्वा
देर्वृत्तिनियामकसंबंधत्वाभावात्। व मणिदीपिने ००००००००००००००००

हंतीत्यनिमित्तत्वमर्थः। तत्र प्रत्ययोऽन्यत्वसंबंधेनैव वर्त्मना। सिद्धत्वेपि यथेष्ट विनियोगवत्वेनेष्ठा
याः संभवात्। तथा च धर्मप्रत्ययोऽस्य हननानुकूलकृतिमानिति बोधः। केचित्तु जन्यत्वमपि शि
३९ रदादिपदसमभिव्याहारात् शरत्वावच्छिन्नजन्यत्वं लभ्यते। तथा च शरादि पुष्यति समस्तशर
दादिस्थादौ शरज्जन्यपुष्पाश्रयाः सं[redacted] पक्वादिति बोधः। शरादि पुष्यंति सा द्रुमा इति
नेत्यपुष्पे पुष्पशरत्वावच्छिन्नजन्यत्वाभावात्। केचित्तु सामानाधिकरण्यमपि। तदपि कालिके दे
शिके वा। तत्राद्यं गोषु दुह्यमानासु गतः स्यादौ तथा च दोहनाधिकरणसमानकालो गमनके
र्त्तेति बोधः। गमने दोहनसमानकालीनत्वबोधस्त्वौत्तरकालिकः। अपरं च गुणकर्मत्वसति मो॰
सत्वाविस्यादौ। केचित्तादात्म्यमपि यथा दानेकराशिमद्रत्यादौ तत्समानेकदेशोसा
मेन्वयः। तथा च दानाभिन्नकर्णसाम्याश्रय इति बोधः। यथा वा गोषु दुग्धासु संपन्नक्षीरि
स्यादौ। अत्र दुग्धपद संपन्नक्षीरपदयोः तदन्यापर्थः। युगपदिति द्रूपविरोधानंगीको
रात्र युगपदन्वयलक्षणो भयबोधः केचित्तु साभिन्नत्वावच्छेदेन संपन्नक्षीराभिन्नान्वयः। गवा

भिन्नदुग्धानां तादात्म्यावच्छेदेन च संपन्नक्षीराणामन्वयः। तेन गोतादात्म्यवती दुग्धा संपन्नक्षीरा गोतादा
त्म्यवती दुग्धान्यो संपन्नक्षीरान्येति बोधः। वारणं च गोषु गोः संपन्नक्षीरे सत्र[redacted]स्यगो द्वियं संप
न्नक्षीरित्वस्य च गोतादात्म्यवद्दुग्धावच्छेदेन संपन्नक्षीरत्वाभावात्। गोत्वात्मत्वावच्छेदेन दुग्धत्वावच्छे
देन संपन्नक्षीरान्यत्वाभावात्। एवं निर्धारणष[redacted]अपि। शेषषष्ठ्यास्तु स्वस्वामिभावादिरनेकवि ष्मा
धः संबंधोर्थः। आख्यातत्वं संकेतविशेषसंबंधेन आ[redacted]ख्यातपदत्वरूपं दशलकारसाधा
रणं। ते च लडादयस्तत्र च लडत्वादिना वर्त्तमानत्वादौ शक्तिः। वर्त्तमाने लडित्यनुशासनात्। भावप्र
धानो निर्देशः। आख्यातत्वेन कल्पलाघवात्। पचतीत्यत्र कृतेर्बोधः स्योगत्वतीत्यादौ तत्र आश्रयत्वा
दौ लक्षणा। वर्त्तमानत्वं च प्रयोगज्ञानाधीनशाब्दबोधाधिकरणत्वं तत्काले एव तदुक्तिवाच्यर
पाकादौ तद्व्यवहारः। मौनिश्लोकादौ चलिप्यादिज्ञन्यप्रयोगज्ञानसमसूतमेव प्रयोगाधि
करणत्वेच वलिरक्षत्वादिचत्वस्वरूपसंबंधानुगमकः। प्रयोगाधिकरणकालेऽस्ति मित्येवं
शक्तिग्रहाद्देवतदादेश विशेषरूपेण बोधः। प्रयोगोपि प्राथमिको ग्राह्यः। तेनेदानींत

६०

न प्रयोगाधिकरणकालवृत्तित्वाभावे पि मथुरां यातिमाधव इत्यादौ नानुपपत्तिः। चैत्रः पच
तीत्यादौ सुप्तिङ्‌ध्यामे[redacted] कमेकत्व मित्वसंप्रीतपचतीत्यादौ निपातात्ख्यातान्यामेकमेव व
र्त्तमानं बोध्यते। एवमेव च हर त्यघसंप्रतीत्यादावुपपत्तिः[redacted] इव वर्त्तमान[redacted]सामी[redacted]र्थं के स व्या ३
स्यागमने वान्वयः। केचित्तु सत्तिरपि तदर्थः। यथा नश्यति श्यती त्यादौ। अन्यथा नाश[redacted]स्ये
दानीमपि सत्वेन। चिरनष्टे पि घटे नश्यतीति प्रयोगापत्तेः। वर्त्तमानत्वं च धात्वर्थे अन्वेति।
अत एव वर्त्तीमानक्रियावृत्ते ध्वंसीतोरिति साधु संगच्छते। आख्यातार्थकृतौ तदन्वये पा
ककाले पचतीति न स्यात्। चेष्टायाः कृतेर्मुहूर्त्तराहतत्वात्। स्याच्च पाकपूर्वमिति। भूतत्व
मनद्यतनत्वं परोक्षत्वं चलिटो र्थः। प्रयोगज्ञानाधीनज्ञानाधिकरणकालवृत्तिध्वंस
प्रतियोगित्वं भूतत्वं। पूर्वरात्रावर्धविशिष्टोत्तररात्रिपूर्वार्धविशिष्टदिनत्वमद्यतनत्वं त
द्भिन्नत्वमनद्यतनत्वं। परोक्षत्वं च प्रयोगज्ञानाधीनज्ञानाधिकरणकालिकप्रयोगानु
संधातृनिष्ठसाक्षात्कार[redacted]गामीत्याकारकज्ञानाविषयत्वं चितयं धात्वर्थे न्वेति। एतद

६० राम

[redacted]

मिश्रे सैव भूतानद्यतनत्वे तैपरोक्षार्थवृत्तेर्धातोस्तु कृतः शास्त्रीकेः। एवमुत्तरत्र भविष्यत्वमनद्यतनत्वं लुडर्थः। भवि
ष्यत्वं च वर्त्तमानप्रागभावप्रतियोगित्वा। भविष्यत्वमात्रं लृडर्थः। लोड्‌लिङोर्लिङ्‌र्थश्च विधिराशीश्चा विधिर्निमं
त्रणामंत्रणाधीष्टसंप्रश्नप्रार्थनेषु लिङ् लोटौ दृस्तनुशासनादिविधिः। प्रवर्तनं पूर्वं निरुक्तं। आशीश्च वक्त्र
च्छाविषयत्वं तेन भवतु ते पुत्र इत्यादौ त्वत्कर्तृकक्रियाविषयोत्पत्तिमानपुत्रसंबंधी इति बोधः। एवं भूयादित्या
दावपि। हेतुहेतुमद्भावोपि लिङर्थः। यथा ब्राह्मणाय चेद्गुरुं लभेत तेनयातमाददीत्यादौ तत्र ब्राह्मणान[redacted]
गोरक्षस्य ज्ञाते यातेनहेतुत्वबोधात्। लृङ् श्चानद्यतनत्वमनीतत्वं। लुङो भूतत्वमुत्पत्तिश्च। व्याप्यक्रि
यया व्यापकक्रियायाः आपादनं लृङोर्थः। यथा सुवृष्टिश्चेदभविष्यत्तदा सुभिक्षमभविष्यदित्यादौ।
अत्र सुवृष्टि भवनरूपव्याप्यक्रियया सुभिक्षभवनरूपव्यापकक्रियाया आपादनात्। अधिकं स्वयमूह्यं।
शक्तपदमिति स्वनिरूपकविषयतानिरूपितप्रकारतावच्छेदकघटकत्वम्यत्वनिरूपकत्वरूपपरंपरा
संबंधेन निरूपकत्वसंबंधेन ता[redacted]न्त्वमित्यर्थः अस्मादिति। न सद्बोधजनकयोग्यविषयताया
वच्छिन्नप्रकारतानिरूपितविशेष्यतासंबंधेन शक्तिज्ञानवत्त्वं तत्पदशक्यत्वमित्यर्थः। एतेन शक्तेर्वृत्त्या
याः सत्वात्रविषय अतो दुग्धादपद शक्यत्वं तीरस्यापि स्यात् इत्यादिद्भूषणं [redacted] निरस्तानीशोदोगंगादिपे राम

दजन्यबोधविषयतासत्वेपि तदंशेशु द्विषयत्वादिनैवलाघवाद्विषयत्वादिप्रकारकत्वं इष्यते प्रायानुपग
म्यनेन तु विशिष्टविषयत्वादिनैव मात्रस्य अभ्युपगमात्। न च ज्ञानकृतिभ्यां विनिगमनावि
रहः। अर्थतात्पर्यज्ञानानुरोधेन तत्राकारत्वेस्यैतत्प्रायाकल्पकत्वेन तादृशेच्छाज्ञानहेतुत्वस्य
क्लृप्तत्वात्। आधुनिकसंकेतज्ञानसाधारणकार्यकारणभावलाघवानुरोधेन शक्यार्थ
शक्तित्वोपगमस्यायुक्तत्वाच्च। एवं च जातिविशिष्टव्यक्तौ केवलव्यक्तौ वा तथा च समवा
यसंबंधेन गोत्वप्रकारकोपस्थितौ शाब्दबोधे च गोपदं शक्तिसंबंधेन गोत्वविशिष्टवत् गो
त्वविशिष्टशक्तिमद्वेत्याकारकनिर्णयत्वेन कारणता शक्तिमत्त्वेन। संदिग्धत्वात् पदादिप
दादौ पदोपस्थितेः शाब्दबोधस्यैवानुत्पाते निर्णयत्वप्रवेशः। इत्थं च पदज्ञानविषयतायां पदपक्ष
पदकवृत्तिसंबंधित्वेन ज्ञाने वृत्तिस्मरणस्यानुभवसिद्धस्य कसंबंधिज्ञानस्यापरसंबंधि
स्मरणोद्बोधकविधयाहेतुत्वात्। केवलजातावेव शक्तिः। पंगोदं शक्तिसंबंधेन गोत्ववत्
गोत्वशक्तेवेत्याकारकज्ञानस्यैव गोत्वविशिष्टशाब्दत्वस्य कार्यतावच्छेदक तु कल्पनेनैव
बोधे व्यक्तिविषयकत्वोपपत्तिरित्याहुः। ते कालोगोः ॰॰॰॰॰॰॰॰

पदं गोरित्यप्रत्ययेन ज्ञातेः समवायातिरिक्तत्वसंबंधेन प्रकारतया भानासंभवेन गवेतरत्तरासमवेत
त्वेसतिसकलगोसमवेतत्वेन तस्य प्रकारत्वे गौरवात्। पत्तु जातिविशिष्टव्यक्तौ कल्पनेपि विनिगम
नाविरहेणार्थविशेष्यकपदविशेष्यकशक्तिज्ञानयोः कारणत्वकल्पने गौरवात्। जातिशक्तिवादे तु
पदविशेष्यकजातिप्रकारकज्ञानत्वेनैव हेतुत्वं न तु जातिविशेष्यकज्ञानत्वेन। तथा सति धर्मि
तावच्छेदकविधया गोत्वत्वादिनिवेशे गौरवात्। जातेः समवायेन स्वरूपतो भानमिति नियमेमा
नाभावादिति। तच्चिंत्यं। अस्मन्मते पि पदविशेष्यकार्थप्रकारकज्ञानस्यैव हेतुत्वं न त्वर्थविशेष्य
कपदप्रकारकस्य निर्णयत्वस्याविशिष्टनिविष्टनीयतयार्थनिर्णयत्वापेक्षयापदनिर्णयत्वस्य
गुरुशरीरत्वात्। पूर्वोक्तयुक्तेः जाते समवायेनैव स्वरूपतो भानमिति नियमस्यावश्यकत्वा
च्च। तदुक्तं हृच्छ्र प्रथमतो वैलक्षण्यव्यवहारात्। एतदुत्तरं च व्याकरणादितः इति स्फुटमन्यत्र लक्षणा
पि वृत्त्यन्तरे साचशक्यसंबंधरूपा श्रुत्या गोत्वानेदेनचसादृश्या। सादृश्यातिरिक्तसंबंधेनाप्या
सादृश्यसंबंधेनासा तदुक्तं धातुहस्वार्थाच। साजहन्निस्वानिपदान्यर्थवाक्यार्थेपस्या।

स्याऽऊहात्वार्था तद्भिन्नाजरूढत्वाद्याऽपङ्किपदे धूमोस्तीत्यादावाव्याप्तिर्णोपि गमनान्वयात् । पदं चतुर्विधं
यौगिकं रूढं योगरूढं यौगिकरूढं चेति । आद्यं पाचकादिपदं योगेन पाककर्तृबोधकं । [illegible] द्वितीय
घटादिपदं रूढ्या घटादिवाचकं । तृतीयं पङ्कजादिपदं योगरूढ्या पङ्कजनिकर्तृत्वेन पद्मत्वेन च पद्म
कं । चतुर्थं मंडपपदं योगेन मंडपानकर्तुः रूढ्या वितानस्य बोधकं केचिदिदं नाधिकं मन्यते । यौगिका
द्येवांतर्भावात् । आकांक्षेति । तज्ज्ञानमित्यर्थः । पदस्येति यादृशसंबंधेन यत्पदनिष्ठयत्पद
स्य व्यतिरेकप्रयुक्तो यादृशान्वयबुद्ध्यभावस्तस्य तत्पदस्य तादृशसमभिव्याहारसंबंधेन तत्पदव
त्त्वं तादृशान्वयबोधे आकांक्षेत्यर्थः प्रकृतान्वयबोधसमानाकारोऽन्वयबोधाभावश्च
स्वरूप[illegible]सती प्रयुक्तत्वं च कारणाभावात्कार्याभाववदित्यादिप्रतीतिसाक्षिकः स्वरूपसंबं
धविशेषः भवति चात्र वह्नितत्पूर्वत्वसंबंधेन घटपदनिष्ठाम्पदस्य व्यतिरेकप्रयुक्तो घटी
याकर्मत्वेस्यान्वयबोधाभाव इति घटपदस्याम्पदवत्त्वं तादृशान्वयबोधे आकांक्षेति ल
क्षणसमन्वयः । अत्र चान्वयबुद्ध्यभावो तं परिचायकं तत्तत्संबंधेन तत्तत्पदवत्त्वविशि

तत्संसर्गकत्वविशिष्टवत्त्वमेवाकांक्षा तन्निर्णय एव शाब्दबुद्धौ हेतुः । इदं च तात्पर्यमानश
ब्दस्य करणत्वपक्षमवलंब्याभिहितं । अत एवानुपदं वक्ष्यति । वाक्यार्थज्ञाने शाब्दज्ञानं तत्करणं
शाब्द इति । ज्ञानकरणतापक्षे तु यादृशसंबंधेन यत्पदत्वावच्छिन्नान्नविशेष्यकयत्पदत्वावच्छि
न्नप्रकारकोपस्थितित्वावच्छिन्नव्य[illegible]तिरेके तिवाच्यं ज्ञानकरणतापक्षे पदव्यतिरेकस्याप्रयोजक
त्वात् । कारणाभावस्यैव कार्याभावप्रयोजकत्वात् तदुक्तं हि दीक्षितैः सर्वत्र अर्थाभाव इति । तद्यु
क्तित्वेतद्व्याप्तिनिष्ठव्याप्यवृत्त्यभावप्रतियोगितावच्छेदकत्वशून्यत्वं तदव्याप्तौ तद्युक्तौ
यते त्वर्थस्तेन प्रमेयमभिधेयमित्यादौ अभिधेयत्वादेर्बाधस्याप्रसिद्धत्वेपि न क्षतिः । न वा वृक्षः कपिसंयो
गीत्यादावव्याप्यत्वं अर्थं तद्युक्तित्वादौ बाधप्रतियोगितावच्छेदकत्वस्याभाव इत्यर्थः । पयसा सिंचतीत्यादौ
करणत्वनिष्ठतत्तद्युक्तित्वेपयोनिष्ठाभावप्रतियोगितावच्छेदकत्वशून्यत्वमिति लक्षणसंगतिः संशयनिश्च
यसाधारणैतत्ज्ञानं हेतुः । तत्त्वमावच्छिन्नविशेष्यकत्वधर्मावच्छिन्नाभावनिर्णयाभावो वा स्वरूपसती हेतुः ॥
पदानामिति प्रकृतान्वयबोधाननुगुणतत्पदध्वंसाधिकरणक्षणभिन्नत्वे सति यत्तत्पदप्रागभावाधिकर

एतस्यप्रागभावानधिकरणक्षणस्तदुत्पत्तिकतत्पदत्वं तादृशान्वयबोधोपयिकासत्तिः तज्ज्ञानं च शाब्दबोध
हेतुः। तेन स्थाल्यामोदनं पचतीत्यस्य नानासत्त्वे तात्पर्यज्ञानं च न शाब्दधीकरणं। किं तु तत्तत्प्रकरणादिज्ञा
नं तद्ग्राहकत्वेनावश्यकत्वादिति मूलाभिमानः। आकांक्षादीति। न प्रमाणं। न प्रमितिजनकं। गौरश्वपोराधाराधेयभा
वेनान्वये निराकांक्षत्वात् तादृशान्वयबोधस्य प्रथमं तत्तत्सद्व्यतिरेकाप्रयुक्तत्वात्। एवं घटः कर्मत्वमित्यादा
वपि बोध्यं ईश्वरेति। भ्रमादिदोषरहितत्वेन तदुक्तस्य प्रमितिकरणत्वादिति भावः आप्तेति। भ्रमप्रमा
दादिशून्य आप्तः। संशयेत्यादि। वह्निर्यदि निर्वह्निः स्यान्निर्धूमः स्यादिति तर्कस्य स्वविपर्ययत्वाभावात्
इदेनोपन्यासः। एकस्मिन्धर्मिणीति। एकधर्मावच्छिन्नविशेष्यतानिरूपितविरोधसंसर्गावच्छिन्नो
भयप्रकारताशालितानरत्वं संशयत्वं। समुच्चये विरोधभानानंगीकारान्नदोषः। विरोधविषयतायां च
संशयजनकीभूतदोषविशेषस्य नियामकत्वं। अत एव बाधकशब्देनोल्लेखः। संशयस्यामिथ्येति। त
द्भाववद्विशेष्यतानिरूपिततत्प्रकारताशालित्वं विपर्ययत्वं। न च त्वे तत्रैव स्मृत्या स्मरणात्मकं ज्ञानं द्वय
मेवाभ्युपेयं। प्रवृत्तिं दृष्ट्वा यत्रापि शुक्तिविशेष्यकरजतभेदप्रकारकज्ञानाभावत्वेन हेतुत्वं स्वीकरणी
यमिति न तत्सिद्धिरिति वाच्यं शुक्तिविशेष्यकरजतभेदप्रकारकज्ञानाभावत्वशुक्तिविशेष्यकरजत

त्वप्रकारकज्ञानत्वे हेतुत्वकल्पनस्योचितत्वेन तत्सिद्धेः। व्याप्यारोपेणेति। पक्षधर्मतांशे आहार्यत्वं व्याप्यत्वा
रोपज्ञानत्वेन्याहार्यमानसलक्षणज्ञानमित्यर्थः अत्र आव्याप्यव्यतिरेकनिर्णयः कारणं। आपादकांशेपूर्व ८२
बाधधीश्च। आपाद्यव्याप्यापादकवत्त्वज्ञानं तत्र च प्रमात्वज्ञानाभावोपि आपादकतांशे व्याप्यत्वांशे
त्वप्रामाण्यज्ञानाभावोपेक्षित एव। दृष्टापत्तिर्मूलशैथिल्यं विपर्ययपर्यवसानं चेति त्रयो दोषाः दृष्टा
पत्तिः। पक्षे आपाद्यनिर्णयः स च कारणीभूतापाद्यव्यतिरेकनिर्णयविघटकत्वाद्दोषः। मूलशैथिल्यं आ
पाद्यापादकयोर्व्याप्यज्ञानं तस्य चापाद्यव्याप्यापादकवत्त्वज्ञानविघटकत्वेनदूषकत्वं तत्को
टितावच्छेदकावच्छिन्नसाध्यकविपर्ययप्रतियोगितावच्छेदकावच्छिन्नापाद्यापादकतर्कस्यैव त
दवच्छिन्नशंकानिवर्त्तकत्वं। न तु केवलं तद्विशिष्टबुद्धित्वावच्छिन्नप्रति तदापादकतर्कत्वेन प्रतिबं
धकत्वं। अन्यथा वह्निघटान्यतराभाववान् स्यान्निर्धूमः स्यादित्यादितर्कस्यापि वह्न्यभावशंका
निवर्त्तकत्वापत्तेः। तथा चाद्याद्यभावेनापादकाभावसाधनेन तत्कोटितावच्छेदकावच्छिन्नोपर्यवसा
ने तर्कस्याप्रतिबंधकत्वात्। तस्य दूषकत्वं। न च तर्ककारणीभूतापादकाभावव्याप्यापाद्याभाववन्नि
श्चय एव विशेषदर्शनविधया पादकवत्ताज्ञानं विरुध्यादिति किं तर्केणेति वाच्यं। तत्रारोपितर्कस

लेऽशेः काप्रतिबंधायत्तदावश्यकत्वात्तन्मूलकमानसत्वादशाविशेषदर्शनस्य कुतश्चित्प्रतिबंधकादनुत्पादे नानियतत्वादि सत्वे पल्ल
वितेन सच्चतर्कोऽपि द्विविधः। विषयपरिशोधको व्याप्तिग्राहकश्चेति। तत्राद्यमाह। यथेति। द्वितीयस्तु वह्निव्यभिचारी स्याद्वह्निजन्यो न
स्यादित्यादिः। वस्तुतः सर्वस्यापि यत्किंचिद्विषयपरिशोधकत्वेऽपि व्याप्तिग्राहकत्वे नियतत्वेनाभिगर्वः। सर्वेषामिति। अनुकूलं च तत्वे
दनीयं चेत्यर्थः। अनुकूलं च दुःखेतरद्वेदनीयं साक्षात्कारविषयं। तथा च स्वाश्रयसमानाधिकरणसमानकालीनसाक्षात्कारविष
यताव्याप्यदुःखत्वेतरजातिमत्सुखमिति पर्यवसितं। यद्वा अनुकूलमिति वेदनीयविशेषणं। तथा च एकप्रकारकप्रमाविष
यत्वं पर्यवसितं। एकस्य चित्सुखत्वातिरिक्तेपि दुःखसप्रकारकप्रमाविषयत्वात्। सर्वेषामिति। एवं दुःखलक्षणेपि तत्र प्रतिकूलत्वं द्वेष्य
त्वमिति विशेषः। तद्द्विविधं वैषयिकं मानोरथिकं च। तत्राद्ये स्रक्चंदनवनितादिसंयोगनिमित्तं धर्मस्तत्संपादनद्वारोप
युक्तः। मानोरथिके चेज्ञाननिमित्तं। उभयत्र समनःसन्निकर्षोऽसमवायी समवायी चात्मेति तत्स्वेमनित्यादिक्षणस्यापि चान
त्यसुखानंगीकारात्। ईश्वरस्य कर्तृत्वग्राहकमानेनैव नित्यज्ञानादिमत्त्वसिद्धेः। सर्वेषां प्रतिकूलेति सुखलक्षणमेव
दुःखेतरपदस्थाने सुखेतरपदं प्रक्षिप्य ज्ञेयं। अत्र च वैषयिके कंटकादिसंयोगो निमित्तं। मानोरथिके व्याघ्रादिज्ञानं।
अधर्मोपि पूर्ववदेव संयोगादिसंपादकः। शेषं पूर्ववत्। सुखदुःखादिप्रयोजकादृष्टस्य भोगएव मुख्यप्रयोजनत्वं न
ख२ तु भुज्यमानेसु दुःखे। अन्यथा भोगो न स्यात्। भुज्यमाने जनयितेव ततः शत्राततस्या भोगस्यावश्यकत्वं।
अत एव न्यायवार्तिकटिकायां वाचस्पतिमिश्राः। दुःखदुःखबुध्युत्पादएव च धर्माधर्मयोरुपयोगो न तु सुखदुः
खोत्पाद इति। इच्छा कामपदवाच्येत्यर्थः। यद्यपि भाष्यादौ कामस्येच्छाप्रभेदत्वमुक्तं तथापि स्वर्गकामइत्यादाविच्छा

मात्रवाचकत्वावगमादिच्छामभिधानं। यद्वा कामवृत्तिगुणत्वव्याप्यजातिमत्त्वं स्फोरणाय कामइत्युक्तिः लाघवेनता
दृशजातिमत्त्वस्येच्छालक्षणत्वात्। एवमुक्तत्रापि सा चेच्छा मीमनुष्यात्वसाय सिद्धा। इयं चोपायविषयिणी समानधर्मतावच्छे
दकत्वेष्टसाधनताज्ञानसाध्या। फलविषयिणी च फलज्ञानसाध्या। अत्र च भाष्ये कामोऽभिलाषो रागः संकल्पः का
रुण्यं वैराग्यं उपधाभावइत्येवमादयइच्छाभेदाः। मैथुनेच्छा कामः। अभ्यवहरणेच्छाऽभिलाषः। पुनः पुनर्विषयानुरंजने
च्छा रागः। अनासन्नक्रियेच्छा संकल्पः। स्वार्थमनपेक्ष्य परदुःखप्रहाणेच्छा कारुण्यं दोषदर्शनाद्विषयपरित्यागे
च्छा वैराग्यं परवंचनेच्छा उपधा कपटापरपर्याया। अंतर्निगूढेच्छा भावः। चिकीर्षा जिहीर्षादिक्रियाभेदादिच्छाभेदा भ
वंति। चिकीर्षा कर्तुमिच्छा जिहीर्षा संहर्तुमिच्छा। आदिना परद्रव्यादानेच्छा स्पृहा अनवश्यकर्तव्येपि स्वद्रव्यापरित्या
गेच्छा कार्पण्यं अन्यायेन परद्रव्यादानेच्छा लोभइत्यादेः परिग्रहः। अत्र च ज्ञानं निमित्तकारणं। आत्ममनःसंयोगो
समवायी चात्मेति बोध्यं। क्रोधो द्वेषइति। क्रोधेनेच्छादेः द्रुहइत्यर्थः। द्वेषत्वजातिमत्त्वं लक्षणं क्रोधइत्युक्तिस्तु पूर्व
वत्। यदाह भाष्यकारः। द्रोहः क्रोधो मत्सरोऽसूयाऽमर्ष इति द्वेषभेदाः। तत्राशुतरानिवर्ती क्रोधः। चिरानुवित्ते
धोऽपकारपर्यवसायी द्रोहः। निष्ठाऽपकारासमर्थस्यापकारिणि द्वेषो मन्युः। परोपकारासहनं मत्सरः। परगुणप
रिभवापकारसमर्थो द्वेषोऽमर्षः। असूया घृणा। आदिनेर्ष्यासूयादयो ग्राह्याः। अत्र च दुःखं स्मृतिर्वाऽसमवायी
कारणं शेषं पूर्ववत्। कृतिः प्रयत्न इति। कृतिपदवाच्य इत्यर्थः। प्रयत्नत्वजातिमत्त्वं लक्षणं। यदाह भाष्यकारः प्रय

नःसंरम्भ उत्साहः कृतिरिति पर्यायाः । तिअविसाजीवस्येति । जीवनयोनियत्नो द्विविधः । यदाह भाष्यकारः स द्वि
विधो जीवनपूर्वक इच्छाद्वेषपूर्वकश्च । सुप्तस्य प्राणापानादिसंतानप्रेरकः प्रबोधकाले मनस इ
न्द्रियान्तरप्राप्तिहेतुः स आद्यः । आद्यो क्रियाः साधारणनिमित्तजन्याक्रियात्वादित्यनुमानमेव
तत्र मानं । द्वितीयस्तु इच्छापूर्वकोयः घटाद्युपादाने तत्त्वादेकुविद्धदेः करणद्व्यापारहेतुः । द्वेष
पूर्वकस्तु शत्रुवधादौ प्रवृत्तः । यमाद्यत्वमिवृत्तिः नेचवैपरीत्यसषुप्तौ तत्कायौपत्तेः । अत्र चेच्छा
निमित्तं प्रयत्नवदात्ममनःसंयोगासमवायीकारणक क्रियारूपचेष्टाहेतुश्चा विहितेत्यादिवि
हितनिषिद्धत्वक्रियाजन्यतावच्छेदकसुखदुःखासाधारणकारणतावच्छेदकजातिमन्तौ
धर्माधर्मौ । मिथ्याज्ञानजन्यवासनोजन्यतावच्छेदकजातिश्चोभयसाधारणी अदृष्टत्व
रूपा । एतद्द्वयमप्यतीन्द्रियं । न चात्र मानाभावः । आशुविनाशियागनिष्ठावेदबोधि
ताकालान्तरभाविस्वर्गसाधनस्य न तास्यद्वारा साक्षाद्साधन [redacted] तात्वादित्य
नुमानस्य । वैमानत्वात् । नच यागध्वंस एव तद्व्यापारोस्तु घटादिनाशकारणतोत्पत्ति
योगिनः कपालादेश्च घटादिनाशप्रतिप्रतिबन्धेकत्वस्यायाश्चैतु मत्त्वकल्पत्वात् इतिवाच्यं । तस्य

कीर्तनादिनाशत्वानुपपत्तेर्ध्वंसस्य ध्वंसासंभवात् । नच धर्मो विहितक्रियाक्षरतिः कार्यजननाच्च
भवति फलं नोत्पादयतीति तत्र धर्मान्तरोत्पत्तिरिति वाच्यं । चिरातीतेन कीर्तनादिना कालान्तरभाविस्वर्ग
फलप्रतिबन्धायोगात् । नच कीर्तनध्वंसस्य विरोधीति वाच्यं । अकीर्तितकर्मस्थलीयसाम
ग्रीबलेन कीर्तितस्य फलजनकतायादुर्वारत्वात् । एवं प्रायश्चित्तादिनाप्यत्वेन दुरिता
पूर्वसिद्धिः ध्वंसस्य निषिद्धक्रियाव्यापारत्वे तत्प्रायश्चित्तस्यापि तरकोत्यावप्रसंगा
त् । एवं तत्त्वज्ञाननाश्यतयाप्यदृष्टसिद्धिरित्यादि बहुतरमूह्यं । गंगास्नानादौ देवताप्री
तेरभावेनेश्वरस्वमते प्रीतेरभावेन चदेवताप्रीतेर्द्वारत्वस्यासंभवात् मसंभावितत्वमितिदि
क् । संस्कार इति । संस्कारत्वजातिमत्त्वं लक्षणं । वेगस्थादि । वेगश्च कारणगुणा । स्यघते । क्व दु
र्मज चित्कर्मणोपि । कौ [redacted] नकश्च नवप [redacted] तिचविलक्षणसंयोगात् । क्वचिदाश्रयना
शादिलक्षणकर्म तु श्वनिचक्रियातिरिक्ते वेगे मानाभावः । वेगेन च क्रतीस्पध्यक्षस्येवमा
नत्वात् । पृथिव्यादीति मूर्तत्वादित्यर्थः । दृष्टश्रोतानुभूतेष्वर्थेषु स्मृतिप्रत्यभिज्ञानहेतु

इति भाष्यदर्शनादनुभव एव भावनाकारणमिति काणादमताभिप्रायेणाह। अनुभवजन्येति। वस्तु
तस्त्वनुभवपदं ज्ञानसामान्यपरं स्मृतिहेतुरिति। समवायघटितसामानाधिकरण्यसंबंधावच्
छिन्नस्मृतित्वावच्छिन्नजन्यतानिरूपितजनकतावच्छेदकजातिमत्त्वं तल्लक्षणं। अतीन्द्र
ियश्चायं। न[illegible]चात्र मानाभावः। ज्ञानेन कालान्तरभाविस्मृतिजननं न न हार त्वेनैव
ताक्लिष्येमैनं च ज्ञानध्वंसस्यैव द्वारत्वं। तस्यासत्तित्रयक्षाज्ज्ञानानन्तरं क्षणगतो द्वौ धक
[illegible] कालेस्मृत्यापत्तिर्मन्मते संस्काराभावादेव नापत्तिः। तेत्रोपेक्षान्यज्ञानत्वेन हेतुत्वात्। ज्ञानस्मे
रणे संस्काराणां च समानविशेष्यकत्वेनैव च कार्यकारणभावः। नानाकं वास्येसमानप्रकार
कत्वस्मृतिः विरोधिज्ञानादिवानतुगतमेव स चाभ्यासादिनादृढतरउस घतेतेन स्मृतिदृढत
न नेत्रबोधकं सहकारितत्त्व साहेश्यदर्शनाघकं विविधं। अन्यथेति। लक्षणं संस्कारत्वव्या
प्यजातिविशेषवत्वं। श्रोतीन्द्रियो निसैऽमिस्थगतोऽपि सकारणगुणजन्य ध क्रियाविशेष ४४
हेतुश्च बालादुन्नमिन धनुर्वाणस्वाश्रियाश्राश्रयस्य यथा पूर्वसंयोगजनिकाविलक्षण

विलक्षणं कारणं कल्पयतीति तत्सिद्धिः। वेगस्तु स्वदेशोत्तरदेशसंयोगजनिकक्रियामात्रजन
कः। स च सि पृथिव्यादिषु सिध्यति तत्वेवत त्कार्योपलब्धेर्वह्निपक्षकमानाक्यमनुमानग्रंथे
ऽनुकूलतत्वं स्थितिस्थापकेनार्थान्तरवारणाय तत्र तदभावादिति कुसुमांजल्युक्तायस्व व
साक्षाद्दकटादिपृथिवीवृत्तिरिति स्पर्शाचवृत्तिरिति ग्रंथास्तु स्थितिस्थापकश्च वृत्तिर्घि
त्तिगुणभाष्यानुसारेण। अरुचिरिष्ठाभावः। लघुत्वं गुरुत्वाभावः। कारिरायस्य त्रोभे
दः। स्नेहाभावप्रवेशोक्षंय। रूक्षपदस्य स्निग्धपर्यायत्वदर्शनादिति नाधिक्यं चलनात्मक
मिति। संयोगविभागयोरप्यपेक्षकारणत्वं। स्वपश्चाद्भाविभावा सहकारेण स्वज
न्यविभागाधानसंयोगजनकत्वमिति यावत्। कर्मत्वजातिमत्त्वं चालक्षणं। चलना
त्मकत्वोक्तिस्तु तादृशजातेश्चलनीत्यनुगतमतिसिद्धत्वस्फोरणाय ननु कर्म

नातिरिक्तं संयोगविभागसंतानस्यैव चलतीतिप्रत्ययविषयत्वादिति चेन्नातिश्चलत्वेपि भू
तलादेः पिपीलिकादिसंयोगविभागादिसंतानसत्वाच्चलनप्रत्ययापत्तेः। संयोगविभागादेर्द्विष्ठ
तया प्रतीतेः। संयोगादिप्रतीतेः प्रतियोगिसापेक्षत्वाच्चलतीत्यादिप्रत्ययस्यात
थात्वादित्यलं। अन्यदिति। भ्रमणं रेचनं स्पंदनोर्ध्वज्वलनतिर्यक्पतनमनमनोन्न
मनादिकं गमनमेवेति। अनियतदेशसंयोगविभागकारणं न चोत्क्षेपणादिकम
पि गमनं तन्मूर्तमेवास्तूर्ध्वं गच्छतीत्यधो गच्छतीत्यादिव्यवहारादिति वाच्यं उत्क्षे
पणत्वादीनामनुगतजातिभेदात्प्रत्ययभेदः। इति धूणत्वादेर्जातित्वादि भ्रमणादेन त्वा
नां सांकर्यान्न जातित्वमिति। कर्तं च पंच अपक्षयणोस्यन्नध्वंसप्रतियोगिता त ४५
थाहि। क्रिया ततो विभागः ततः पूर्वसंयोगनाशः ततः क्रियानाश इति। इदं च प्राचिकं।

आ—पनाशसामग्रीपूर्वकालोत्पन्नस्य चतुर्थत्वाद्दशकालोत्पन्नस्य च द्वितीयेनाशात्। नि
समेकमिति। अनेकानुगतं अनेकसमवेतं। एतल्लभायचैकपदं गोत्वादिसामान्यं च सास्ना
दिमद्व्यक्तिमात्रवृत्ति प्रलये सर्वपिंडानामुच्छेदे सामान्यमुच्छिद्येतेति चेन्न। स्वरूपसत्तायाः
सद्भावात्। न च तस्यैकत्वे नित्यत्वे समवायस्यापि तत्वाद्घटादावपि समवायसत्वाद्गोत्वा
पत्तिरिति वाच्यं। यतः किंचिदधिकरणं रूपसमवायिकारणं किंचिन्नेत्यत्राधिक
रणस्वाभाव एवोत्तरं। तथा च वायो रूपसमवायिकारणत्वाभावात्। न रूपाधिकरण
तेति वत्। अधिकरणत्वाभावोभावादिवन्नत्र गोत्वाधिकरणता संबंधमात्रस्य संबंध्या
धारताप्रयोजकत्वाभावात् संयोगतो ल्पे बदरस्यापि कुंभाधारताप्रसंगात्। द्रव्यगु
णकर्मवृत्ति रूपैसत्तेति। न चात्र मानाभावः। भावी भूतो वर्तमानश्च सर्व एव घ

४९

इत्यनुगतमतिनियामकत्वेनावश्यकत्वात्। विशेषं निरूपयति नित्यद्रव्यवृत्तय इति। नित्य द्रव्यमा
२ टः सन्तु दसदन्त्या इत्यर्थः। सामान्यभिन्नत्वे सति सामान्यरहितत्वे सति समवेतत्वं तल्लक्ष त्रे समवेता २
णं। ते मनित्यगुणादौ आत्मत्वादौ च नातिव्याप्तिः। सामान्यरूपताव्युदासायाह। व्या
वर्त्तका इति। अनुवृत्तिबुद्ध्यजनकत्वे सति व्यावृत्तिबुद्धिजनका इत्यर्थः तथा चानुवृ
त्तिबुद्ध्यजनकत्वान्न सामान्यपतेति भावः। समवायं निरूपयति नित्यः संबंध इ
ति। नित्यत्वे सत्येति संबंधत्वं लक्षणं। संबंधत्वं विशिष्टबुद्धिजनकत्वं। अयं च नंतु
षुवटः समवेतः इति प्रत्यक्षसिद्धः। कयोर्विशिष्टबुद्धिजनक इत्यपेक्षायामाह। अ
युतसिद्धवृत्तिरिति। अयुतसिद्धयोर्वृत्तिः संबंधः विशिष्टबुद्धिजनक इति या
चात्। तदुक्तं भाष्यकृता। अयुतसिद्धानामाधार्याधारभूतानामिहेतुर्यः
संबंधः स समवाय इति। एवं च प्रमाणान्तरमपि तत्र दर्शितं। तथाहि। गुणक्रि ४९

यादिविशिष्टबुद्धिः विशेषणविशेष्यसंबंधविषया विशिष्टबुद्धित्वात् घटवद्भूतलमित्या
दिविशिष्टबुद्धिवदित्यनुमानात्। पक्षधर्मताबलाल्लाघवसहकारेणैकसमवायसि
द्धिः। यथा च समवायस्यैकत्वेपि न दोषस्तथोक्तमधस्तात्। अभावसाधारण्ये न तत्सि
द्धिस्तु न शक्या। घटकाले भूतले घटो नास्तीति बुध्यापत्तेः। नित्यत्वादित्यादिकमुत्तरमू
ह्यं। प्रागभावं निरूपयति। अनादिरिति प्रागभावप्रतियोगित्वे सति ध्वंसप्रतियोगित्वं
प्रागभावत्वमित्यर्थः उत्पत्तेः पूर्वं कार्यस्येति। विघटत इति शेषः एवमुत्तरत्रापि एतस्य च
ध्वंसः प्रतियोगितध्वंसरूपः ध्वंसं निरूपयति। सादिरिति ध्वंसाप्रतियोगित्वे सति
प्रागभावप्रतियोगित्व प्रागभावश्च। अत्यंताभावं लक्षयति। त्रैकालिक इति। नित्य इ
त्यर्थः। नित्यत्वे सति वृत्तिनियामकसंबंधावच्छिन्नप्रतियोगिताकत्वमत्यंताभा

४७

त्वमित्यर्थः॥ रासंतेन ध्वंसप्रागभावयोर्व्युदासः तयोः पूर्वापरकालि नतद्धटत्वादेः संसर्ग
त्वात्॥ तदनुभ्युपगमे तदनपादेयमावर्त्तिनियामकैसादिनान्योन्याभावव्युदासः॥
तस्य तादात्म्यसंबंधावच्छिन्नप्रतियोगिताकत्वस्य स्वयं वक्ष्यमाणत्वेन यथाश्रुतेन तद्वा
रणात्॥ अ[illegible]न्योन्याभावं लक्षयति तादात्म्यसंसर्गेति॥ इदं च स्वरूपकथनं न तु लक्षणं॥
संयोगादेर[illegible]संयोगिता तादात्म्यरूपत्वेनासंताभावसाधारण्यात्॥ लक्षणं तु नित्यत्वेस
ति असंताभातमिन्नाभावत्वं॥ अन्योन्यस्यैव च सान्यधर्मावच्छिन्नप्रतिप्रतियोगिताक
त्वं न तु ध्वंसप्रागभावयोः॥ सामान्याभावे घटपटोभयत्वादिरूपो व्यासज्यवृत्तिः॥ घट
त्वादिरव्यासज्यवृत्तिः॥ दीदिना त्रीहो दंडयेत्रिष्टपादिश्च ग्राह्याः॥ आत्मज्ञानस्यैव मुक्ति
प्रयोजनकत्वेन मुख्यत्वात्प्रथमं द्रव्यनिरूपणं सामान्यरूपेण तस्य बोधे विशे ४७

षजिज्ञासायां कर्तृत्वादिना तन्निरूपणाय तदनंतरं गुणानां संयोगविभागयोरनपेक्षकारण
त्वेन कर्मनिरूपणा[illegible]स्य बोधे विशेषगुणनिरूपणाधानत्वात्॥ अनंतरं कर्मणः परम
परत्वेत्यादिना सामान्यनिरूपणस्य यावदाश्रयनिरूपणसापेक्षः॥ तयायावदा
श्रयनिरूपणोत्तरं सामान्यभिन्नत्वादिना विशेषनिरूपणस्य सामान्यनिरूपणाधी
नतया तदनंतरं विशेषस्य नित्यसंबंधत्वेन समवायनिरूपणस्य विशेषनिरूपणाधीनतया ऽ
नंतरं समवायस्य॥ अभावस्य प्रतियोगिनिरूपणाधीननिरूपणाकतया सर्वांतेऽभावस्य निरू
पणं॥ ननु शक्तिसादृश्यादिनामतिरिक्तत्वात्कथं सप्तपदार्था इत्यत आह॥ सर्वेषामिति॥ श
क्तिसादृश्यादीनां प्रमाणप्रमेयसंशयप्रयोजनदृष्टांतसिद्धांतावयवतर्कनिर्णयवाद
जल्पवितंडाहेत्वाभासच्छलजातिनिग्रहस्थानानां षोडशपदार्थानां चेत्यर्थः॥ यथायथनु
केष्वेवेति सप्तपदार्थेष्वेवेत्यर्थः॥ उत्तेजकाभावविशिष्टमण्यभावस्य दाहं प्रतिहेतुत्व

[illegible]

कल्पनयेवोपपत्तेर्नदाहनुकूलाशक्तिः कल्प्यते। तत्तद्भेदसमानाधिकरणतत्तदसाधारण
साहस्यधर्मरूपस्यैस्यापि तत्तदसाधारणधर्मरूपत्वेनानतिरिक्तत्वात्॥ प्रत्यक्षप्रमाणस्यद्रव्ये
।इतरेषांप्रमाणानांगुणे। प्रमेयाणामात्मशरीरेंद्रियमनसांद्रव्ये। गंधरूपरसस्पर्शशब्द
बुद्धिप्रवृत्तिरागद्वेषमोहानांगुणेप्रेत्यभावोमरणजन्मतदीयमरणंचेतदीयजीवना
म दृष्टनाशः तदीयश्च र[redacted] प्राणसंयोगध्वंसस्तदीयः प्राणे[redacted]
ध्वंसोवातदीयजीवनानेतुतदीयविजातियशरीराद्यप्राणसंयोगः॥तथाचेद
शसंयोगाप्रे। सभावस्यगुणेसुखदुःखोभयभोगरूपफलदुःखयोस्तत्रैव अपवर्गस्य
दुःखध्वंसरूपस्याभावेसंशयस्यगुणे॥प्रत्यक्षदृष्टरूपप्रयोजनस्यवादिनोः साध्य
साधनोभयप्रकारतदभाववत्वप्रकारकान्यतरत्वनिश्चयविषयरूपस्यदृष्टा
तस्यचतत्वेचप्रामाणिकलेनार्थनिश्चयरूपसिद्धांतपूर्वोक्तशब्दविशेषरूपावय १८

वतर्कनिर्णयानांगुणेनानाप्रवक्तृकस्वोभयतत्स्थापनावतोनिर्णयोद्देशप्रवक्तृवचनसंदर्भरू
स्यवादस्यउभयपक्षस्थापनावत्पुरुषशक्त्यशक्तिख्यापनप्रवृत्तवचनसंदर्भरूपजल्पत्र
ल्पस्यजल्पास्यवितिगीपुकथारूपायाविनंडायाःगुणेहेत्वाभासानांचतत्तत्स्थेत्वादिरू
पाणांकूसेधेवावक्तृतात्पर्यविषयेशब्दतात्पर्यकल्पनयादोषचनरूपस्यत्रिविध
स्यापिछलस्यस्वासाधकताप्रजयोकरूपपापरासाधनवचनरूपायाश्चतुर्विंशतिभेदाया
अपिजातेःअखंडिताहंकारेणपराखंडनंनिग्रहःसुष्ठुवसतीतिनिग्रहस्थानानिनि
ग्रहोन्नायकानीतिफलितार्थः॥तेषांप्रतिज्ञाहानिप्रतिज्ञांतरप्रतिज्ञाविरोधप्रतिज्ञा
सव्यासहेत्वंतरार्थांतरनिरर्थकाविज्ञातार्थाप्राप्तकलन्यूनाधिकपुनरुक्ता॥ननु
भाषणाःशब्दविशेषरूपत्वाद्गुणोत्तरप्रतिपत्त्यभावरूपाप्रतिभाष्यनिग्रहस्थानपरं

४९ तभावेस्वसत्वनकेशरमारब्धनश्लोकपाठजैएवा तद्धिरण्यादिरूपोत्तरप्रतिपक्षस्यनुकूल
व्यापाररूपत्वेपियथाकूतेष्वेव॥कथायांकार्योसोद्भावनादिरूपविक्षेपाख्यनिग्रहस्था
नस्यापिवक्ष्यप्रैष्वेव॥स्वपक्षेदोषेमेवेनुद्धष्टस्यपरपक्षेदोषाभिधानरूपमतानुज्ञारूपस्य
तस्यशब्दरूपत्वाद्गुणेअवसरेनिग्रहस्थानोद्भावनाभावरूपपर्यानुयोज्योपेक्षणरू
पस्यतस्वाभावेअनुयोगानर्होनुयोगात्मकनिरनुयोज्यानुयोगरूपस्यातस्यशब्द
दिरूपत्वागुण्यादोपरिगृहीतसिद्धांतविरुद्धकथाप्रसंगरूपस्यतस्यतुशब्देऽतर्भावादितिस
मासः॥अधिकमन्यत्रानुसंबंधेयंनन्विदंन्यायशास्त्रमुतवैशेषिकनयः।नाद्यः।न्यायशावे
ऽतर्भावादितिसमासः।अधिकमन्यत्रानुसंबंधेयंनन्विदंन्यायशास्त्रमुतवैशेषिकन
यः।नाद्यः।न्यायनयेषोडशपदार्थांगीकारात्।नांत्यः।वैशेषिकमतेप्रमाणचतुष्टयां
नगीकारादितिचेन्न।एतस्यन्यायनयानुसारित्वात्।नैय्यायिकैरपिसप्तपदार्थांगी कारा

५० तदुक्तंन्यायकुसुमांजलावाचार्यैः॥अतोभावेनसहसप्तैवपदार्थाइतिनियमइति।व्याख्या
तंचोपाध्यायैः।भावरूपपदार्थाःषट्।अभावस्यापिमानसिद्धत्वतयापदार्थत्वोपगमादिति
विभावः॥अतएवमैकृतः सादृश्यस्यसप्तपदार्थातिरिक्तत्वशंकासंगच्छते।उक्तंचन्यायभा
ष्यकृतापि।अस्त्यन्यदपि।द्रव्यगुणकर्मसामान्यविशेषसमवायाः।प्रमेयं तत्तद्भेदे
नचापरिसंख्येयं।अस्यचतत्वज्ञानादपवर्गोमिथ्याज्ञानात्संसारइत्येतदुपदि
ष्टंविशेषेणेति।सर्वेषांप्रमेयांतर्भावेपिप्रमाणादीनांविशेषरूपेणाभिधानंविचा
रेऽभ्यर्हितत्वादितिस्फुटमाकरे॥ ॥इतिश्रीगाडगिलोपाख्यमुकुंदभट्टविरचि ५०
तातर्कसंग्रहचंद्रिकासमाप्ता॥ ॥श्रीरस्तु॥ ॥कल्याणमस्तु॥ ॥श्रीः॥